जितानीति सर्वं समञ्जसम् ।

Colophon:

आनन्दलहरीं हृद्यामादधानेहचन्द्रिका ।
कुर्यात्कुवलयाभिख्याभूतां सुमनसां पदम् ॥

इति श्रीमत्...अप्पयदीक्षितस्य कृतिरानन्दलहरीचन्द्रिका संपूर्णा ।
सांबशिवाय परमगुरवे नमः । हयग्रीवाय नमः । श्रीकण्ठशिवार्येभ्यो
नमः । जयनूर आमूरी वीरभट्लु कुमारुडु धर्मभट्लु आनन्दलहरी
चन्द्रिके व्राशिनु श्री वीरभद्रन् ।

Subject: Ānandalaharī, a Śaiva Vedāntic Poem with the author's own commentary called Candrikā.

Remarks:—The Ms. is in good condition.

The Ānandalaharī, in 60 verses, with the author's own commentary, Candrikā, sums up the contents of the Śrīkaṇṭha Bhāṣya, establishing in the end that the Tātparya of Śrīkaṇṭha Bhāṣya is Śuddha Śaivādvaita.

Dr. Burnell has wrongly noticed this work under Advaita.

The work has been published by Pandit Hālāsyanatha Śāstri in the Bhāratī Mandiram Sanskṛt Series (No. 2) and

printed at the Śrī Vāṇi Vilās Press, Śrīrangam.

॥ ब्रह्मतर्कस्तवः—सव्याख्यः ॥

8159. BRAHMATARKASTAVAḤ—SAVYĀKHYAḤ.

Burnell's Catalogue No. 6406. Page 92. Left column. Substance—Paper. Size—12½ × 6½ inches. Sheets—41. Lines—10-12 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—Appayyadīkṣita. Complete. Printed.

Beginning:

मू ॥ उच्चावचैरुपनिषद्वचनप्रकाण्डैः
उन्मीलितश्रुतिगणैरुपबृंहणैश्च ।
यस्सादरं समुदितं यमिनामुपास्यं
तद्ब्रह्म शङ्कर भवानिति तर्कयामः ॥ १ ॥

श्री गणेशाय नमः

व्याख्या । अथ ब्रह्मतर्कस्तवस्य नातिविस्तरं विवरणं क्रियते —तत्र स्तोत्रप्रतिपाद्यसकलार्थप्रतिज्ञापरोऽयमाद्यः श्लोकः उच्चावचैरिति ।

End:

मू ॥ श्रीकण्ठ तावकरहस्यविवेकरीति-
मेतादृशीं क इव वेत्ति नरस्सुरो वा ।
त्वन्नामरूपगुणचिन्तनपुण्यमेव
व्याजेन केन चिदाप्तुमिह श्रमो मे ॥ ५० ॥

Colophon:

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभस्य अद्वैतमतप्रतिष्ठापनाचार्यस्य श्रीमदप्पय्यदीक्षितस्य कृतिः ब्रह्मतर्कस्तवस्सव्याख्यानः संपूर्णः ॥

Subject: Brahmatarkastavaḥ, a Saiva Vedantic Poem. 1-50 with commentary.

Remarks:—The Ms. is in good condition.

On the title page is given—

हे पुस्तक + कारकतींत आणिलें अस्सें ।

This work of Appayyadīkṣita, in 50 Vasantatilakā verses, with his own brief commentary, is a Śaiva treatise, trying to bring out, that the Upaniṣadic Brahman is Śiva. It has been printed and published by the Śrī Vāṇī Vilās Press, Śrīrangam.

॥ ब्रह्मतर्कस्तवः—सव्याख्यः ॥

8160. BRAHMATARKASTAVAḤ—SAVYĀKHYAḤ.

Burnell's Catalogue No. 6512. Page 92. Left column. Substance—Paper. Size—14×6 inches. Sheets—47. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—Appayyadīkṣita. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 8159.

After the colophon is found:

अंगिरस्संवत्सरे भाद्रपद्मासे शुक्लपक्षे भृगुवासरे श्रीमच्छरभेन्द्र भूपालाश्रितेन राजगोपालेन लिखितो ब्रह्मतर्कस्तवः समाप्तिमगमत् ॥

शालीवाहनशके....॥

Remarks:—The Ms. is in good condition. Alternate sheets are sulphurated.

॥ ब्रह्मतर्कस्तवः—सव्याख्यः ॥

8161. BRAHMATARKASTAVAḤ—SAVYĀKHYAḤ.

J. L. Collection No. 992.

Substance—Paper. Size—9½ × 5 inches. Sheets—4 (1 and 60-62). Lines—8-12 to a Page. Script—Devanāgarī. No. of Granthas—75. Author—Appayyadīkṣita. Incomplete. Printed.

Beginning—Same as No. 8159.

End:

कृतकृत्यस्य तृप्तस्य मम किं क्रियते नरैः ।
बहिर्वाभ्यन्तरे नाथ मयाभावो हि गृह्यते ॥

इत्यादि शिववचनैश्च प्रसिद्धम् ॥

Colophon:

इति श्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिरंगराजाध्वरिसूनोरप्पय्यदीक्षितस्य कृतौ ब्रह्मतर्कस्तवविवरणं समाप्तम् ॥

सटीकोऽयं ब्रह्मतर्कस्तवः सम्पूर्णः ॥

श्रीपरमशिवाय नमः ।

श्रीशिवार्पणमस्तु । शिवाय नमः ।

फ्रवाब्दीयाश्विजे मासि शुक्लपक्षाष्टमीतिथौ ।
ब्रह्मतर्कस्तवव्याख्यापुस्तकं पूर्णतामगात् ॥ १ ॥

श्री सर्वजीवपशुपाशविमोचकशाश्वतपरमात्मसर्वेश्वरविश्वाधिकशिवचरणकमलद्वंद्वचंचरीकायमाणमनोवृत्तिमप्पयादीक्षितपौत्रेण गङ्गाधरसूनुना वृकोपनामकमहादेवेन प्रवाब्दनिजाश्वीयवलक्षपक्षीयाष्टम्यां भृगुवासरे इदं पुस्तकं श्रीशिवप्रीत्यर्थं शमीवनापरपर्याय तंजानगरे समापितमासीत् ।

Subject: Brahmastava, Savyākhya.

Remarks:—The Ms. is in good condition. But it is almost lost except for 4 sheets. The portion after colophon says that the book is copied at Tanjore by one Mahadeva son of Gaṅgādhara.

॥ ब्रह्मतर्कस्तवः—सव्याख्यः ॥

8162. BRAHMATARKASTAVAḤ—SAVYĀKHYAḤ.

P. A. Collection No. 110.

Substance—Paper. Size—11 × 5. inches. Sheets—14. Lines—7-10 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Appayyadīkṣita. Incomplete. Printed.

Beginning:

श्री महागणपये नमः । सांबसदाशिवाय नमः ।

उच्चावचैः + तर्कयामः ॥ १ ॥

व्या ॥ प्रकाण्डैः प्रशस्तैः प्रशस्तान्युपनिषद्वचनानि कारणवाक्यानि तानि हि ब्रह्मसाधारणलक्षणभूतकारणत्वमुखेन ब्रह्म समर्पयन्ति ।

End :

इति पृष्टेन भगवता सकलसंहर्तृकालाग्निरुद्ररूपं मया दर्शितमित्युक्तम् ।

कालेऽस्मिन् लोकक्षयकृत्प्रवृद्धो
लोकान्समाहर्तुमिह प्रवृत्तः ।
तेऽपि त्वा न भविष्यन्ति लोके
येऽवस्थिता प्रत्यनीकेषु योधाः ॥ इति

Subject: Brahmatarkstava, with commentary 1–9 verses.

Remarks:—The Ms. is in a fairly good condition.

॥ ब्रह्मतर्कस्तवः—सव्याख्यः ॥

8163. BRAHMATARKASTAVAḤ—SAVYĀKHYAḤ.

J. L. Collection 993.

Substance—Paper. Size—$10\frac{1}{2} \times 8\frac{3}{4}$ inches. Sheets—7. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—110. Author—Appayyadīkṣita. Complete. Printed.

Beginning:

श्री गणेशाय नमः ।

उच्चावचैः + तर्कयामः ॥

End:

शश्वच्चेतो मम पशुपते शाल्मलीपुष्पतल्पा-

न्न्यान्देवानतिलघुफलप्रापकान्वर्जयित्वा ।

पादाम्भोजौ तव परिमिलद्दिव्यभृङ्गावलीढे

चन्द्रापीड श्रयतु सरसं चञ्चलीकस्य लीलाम् ॥ ५० ॥

Colophon:

इति श्रीमदप्पय्यदीक्षितविरचितो ब्रह्मतर्कस्तवः समाप्तः ।

Subject: Brahmatarkastava.

Remarks:—The Ms. is in a fairly good condition.

॥ भारततात्पर्यसङ्ग्रहः ॥

8164. BHĀRATATĀTPARYASAṄGRAHAḤ.

Burnell's Catalogue No. 11895. Page 184. Right column. Substance—Palm leaf. Size—18 × $1\frac{2}{8}$ inches. Leaves—26. Lines—6 to a Page. Script—Grantha. No. of Granthas—450. Author—Appayyadīkṣita. Complete. Printed.

Beginning:

अथ श्रीमहाभारतस्य शिवपारम्यप्रख्यापनपरतामावि-

ष्कर्तुं कृतस्य शिवस्तोत्रस्यायमाद्यश्लोकः ।

श्रीबादरायणमुनिस्स्वयमेव विष्णुः
पार्थच्छलात्तमधिकृत्य कृते प्रबन्धे ।
तस्यापि नित्यमहितं शशिभूषणस्व-
माम्रेडयन् गुरुरदर्शयदादितस्त्वम् ॥ १ ॥

End :

तस्मात्कृत्स्नमपि भारतं गीतानुगीतमोक्षधर्मवैष्णवधर्म-
शास्त्रसहितं त्रिशेषध्वनिवृत्त्या शिवपारम्यविश्रान्तम् ।

इत्थं चक्रे भारतं यः प्रबन्धं
व्यक्त्या व्यासः शांभवोत्कर्षवर्षी ।
ध्वन्यध्वन्यध्वन्यमूर्धन्यधन्यः
तं शौरिं तत्साक्षिणं चानतोऽस्मि ॥

Colophon :

इति श्रीमदप्पय्यदीक्षितविरचितं सारभारतस्तोत्रविवरणं सम्पूर्णम् ।
श्रीमदप्पय्यदीक्षितकृतभारततात्पर्यसंग्रहव्याख्या समाप्ता ॥

Subject : Bhāratatātparyasaṅgraha, with the author's own commentary.

Remarks: —The Ms. is in good condition.

The Bhārstatātparyasaṅgraha is a kindred production of the Rāmāyaṇa Sārasaṅgraha, in both of which, Appayyadīkṣita in the form of a Stotra on Śiva, tries to bring out that Vālmīkī and Vyāsa ultimately aimed at the glorification of Śiva's greatness only. Both the works are in verses, followed by the author's own prose commentary.

Dr. Burnell mistakes this work for an abridgment of the Great Epic.

The work has been printed in the Śrī Vāṇī Vilās Press, Śrirangam.

॥ रत्नत्रयपरीक्षा—सव्याख्या ॥

8165. RATNATRAYAPARĪKṢĀ—SAVYĀKHYĀ.

Burnell's Catalogue No. 6407. Page 92. Left column.

Substance—Paper. Size—$12\frac{1}{8} \times 6\frac{1}{2}$ inches. Sheets—24. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Appayyadīkṣita. Complete. Printed.

Beginning:

॥ मू ॥

नित्यं निर्दोषगन्धं निरतिशयसुखं ब्रह्म चैतन्यमेकं
धर्मो धर्मीति रूपद्वयमयतिपृथग्भूयमायावशेन ।
धर्मस्तत्रानुभूतिस्सकलविषयिणी सर्वकार्यानुकूला
शक्तिश्चेच्छादिरूपो भवति गुणगणश्चाश्रयस्यैक एव ॥ १ ॥

॥ व्या ॥

धर्मभूतयोः गौरीनारायणयोः धर्मिपरमशिवभेदप्रतिपादकस्य रत्नपरीक्षाख्यग्रन्थस्यायमाद्यः श्लोकः नित्यमिति।

End:

॥ मू ॥

विद्वांसः शंकरस्य श्रुतिमतिमहितोपासनावासनाभिः
लब्धस्वान्तःप्रतिष्ठासुदृढमभिधया तं विलोक्यात्मनैव ।

गोलोकस्योर्ध्वमार्गादपि परमपदाद्वैष्णवादूर्ध्वदेशे

भास्वत्कोटिप्रभं यात्यपुनरपगमस्थानमानन्दरूपम् ॥ ८ ॥

॥ व्या ॥

परमशिवलोकं प्राप्तानां पुनःसंसरणाभावस्त्वनावृत्यधि-

करणे—

ये संप्राप्ताः परं स्थानं ज्ञानयोगरता नराः ।

न तेषां पुनरावृत्तिः घोरसंसारमण्डले ॥

इत्यादि वचनैर्व्यवस्थापित इति सर्वं समञ्जसम् ॥

आमथ्य भाष्यदुग्धाब्धिं आप्तं रत्नत्रयं ततः ।

शंभुगौरीहरिश्चेति तच्च सम्यक्परीक्षितम् ॥

Colophon:

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभाद्वैतकुलप्रतिष्ठापनाचार्यश्रीमदप्प-

य्यदीक्षितकृता रत्नत्रयपरीक्षा सव्याख्या समाप्ता ॥

श्रीशिवार्पणमस्तु । शालिवाहनशके 1784

अंगिरेब्दे चाश्वयुजे त्रयोदश्यां तु शुक्लके ।

अलिखद्राजगोपालः शरभेन्द्राश्रितः कृती ॥

हे पुस्तक शरभोजिमहराजसाहेबयां च कारकर्तीत लिखले अस्से ।

Subject: Ratnatrayaparīkṣā, a treatise stating that among Gouri, Viṣṇu and Śiva, Śiva is the Supreme Being.

1-8 Ślokās.

Remarks: —The Ms. is in good condition.

The Ratnatrayaparīkṣā in 8 verses, with the author's own commentary has been published by the Śrī Vāṇī Vilas Press, Śrirangam. The Ms. is dated A. D. 1812 and was written by one Gopala at the bidding of Serfoji.

॥ रत्नत्रयपरीक्षा—सव्याख्या ॥

8166. RATNATRAYAPARĪKṢĀ—SAVYĀKHYĀ.

Burnell's Catalogue No. 6511. Page 92. Left column.

Substance—Paper. Size—14×6 inches. Sheets—22. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Appayadīkṣita. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 8165.

Remarks:—The Ms. is in excellent condition. Alternate sheets are sulphurated.

॥ रत्नत्रयपरीक्षा—सव्याख्या ॥

8167. RATNATRAYAPARĪKṢĀ—SAVYĀKHYĀ.

J. L. Collection No. 994.

Substance—Paper. Size—9×6 inches. Sheets—2. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—25. Author—Appayyadīkṣitā. Complete. Printed.

Beginning and subject—Same as No. 8165.

End:

आमथ्य माध्यदुग्धाब्धिमाप्तं रत्नत्रयं ततः ।

शम्भुगौरीहरिश्चेति तत्त्व सम्यक् परीक्षितम् ॥ ९ ॥

Colophon:

शुभकृद्वत्सरीयेश्विजशुक्लप्रतिपदि गुरुवासरे श्रीकोटीश्वरसंनिधौ वृकोप-
नामक मन्यम्भट्टेन विश्वाधिकप्रीत्यर्थमिदमलेखि ।
श्री साम्बशिवार्पणम् ।

Remarks:—The Ms. is in a fairly good condition. On the title page is given:—

'गङ्गाधरेरिदं स्वम्'

The name of the scribe is one Manyambhaṭṭa.

॥ रत्नत्रयपरीक्षा—सव्याख्या ॥

8168. RATNATRAYAPARĪKṢĀ—SAVYĀKHYĀ.

J. L. Collection No. 995

Substance—Paper. Size—11¾×5¾ inches. Sheets—23. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Appayyadīkṣita. Complete. Printed.

Beginning:

सर्वज्ञतादिकं शम्भोः यस्यारूपं विदुर्बुधाः ।
तां नमामि शिवां सत्यज्ञानानन्दस्वरूपिणीम् ॥ १ ॥

अथ रत्नत्रयपरीक्षाख्यां अष्टश्लोकीं संक्षेपेण व्याकुर्म-
हे— नित्यं + एव ॥

नित्यं कालत्रयाबाध्यं दोषगन्धेनापि रहितं—

End, colophon and subject—Same as No. 8165.

Remarks:—The Ms. is in good condition.

॥ शिवकर्णामृतम् ॥

8169. ŚIVAKARṆĀMṚTAM.

Burnell's Catalogue. No. 6301. Page 111. Left column. Substance—Paper. Size—10 × 4½ inches. Sheets—72. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—800. Author—Appayyadīkṣita. Complete. Printed.

Beginning:

वाचारम्भणवाक्येन वारिताभेदसत्यता ।
युक्तितोऽपि निरस्यैनामद्वयं समुपास्महे ॥

यद्यप्यत्र श्रीहर्षादिभिरपि पराक्रान्तमेव तथापि तत्खण्डनविधया न प्रमाणकारणपरीक्षयेति केचिन्न श्रद्दधते ।

* *

तद्ब्रह्माच्युत पूजितांघ्रिकमलं विश्वाधिकं शाश्वतम् ।
सांबं ब्रह्म सदाशिवाख्यमनिशं पश्येयमन्तर्दृशा ॥

End:

'वैष्णवेषु पुराणेषु योऽपकर्षास्तु दृश्यते ।
रुद्रस्यामोहरम्यस्य विभूतेरेव केवलम् ॥'

स एव परमपुरुषार्थप्रेप्सुभिरु(र)पेक्षणीयः प्रपत्तव्यश्रे-

ति सिद्धम् ।

Colophon:

इति शिवकर्णामृतं संपूर्णं । कैलासनायकस्येदं निबन्धनम् ॥

Subject : Śivakarṇāmṛtam.

Remarks :—The Ms. is in a fairly good condition.

The Śivakarṇāmṛta of Appayyadīkṣita is a short prose work in two chapters. The first chapter is devoted to the Pūrvapakṣa and the second to the Siddhānta. It establishes from evidences of Vedic texts, that Śiva is the Brahman of the Upaniṣads as against those non-Śaivites, who taking their stand merely on Pāñcarātra Āgamas, raise Viṣṇu above Śiva.

The work has been published by the Śrī Vāṇī Vilās Press, Śrīrangam.

ŚIVAKARṆĀMṚTAM.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
8170	B. L. 4959	Paper.	$11\frac{1}{2} \times 5\frac{3}{4}$	30	10 or 11	Devanāgarī.	Complete.
8171	„ 9878	Palm leaf.	$15 \times 1\frac{1}{2}$	46 (92-137)	5	Telugu.	„
8172	„ 4960	Paper.	$9\frac{7}{8} \times 4\frac{1}{2}$	31 (16-46)	9 or 10	Devanāgarī.	Incomplete.
8173	J. L. 996	„	$10\frac{1}{4} \times 4\frac{1}{4}$	6	11-13	„	„

DETAILED REMARKS
on
ŚIVAKARṆĀMṚTAM MSS.
IN THE ABOVE TABLE.

8170 The text in this Ms. does not contain at the end the verses and some additional sentences that are contained in No. 8171. This Ms. as also No. 8172 have been mistaken by Dr. Burnell to belong to the section "Śatakas and anthologies."

8171 The following verses and other matter is seen at the end:—

शिवभक्तिकल्पवल्लीमङ्कुरितां मनसि पुण्यबीजबलात् ।
धीराः कुमतिनिदाघाद्रक्षत कर्णामृतोक्तिधाराभिः ॥

धातृमुखैर्धृताय श्रीपतिनान्वीक्ष्य [illegible]धाय ।
शिवलीलामुकुराय प्रणतिं वाक्ब्रह्मणे कुर्मः ॥

इति श्री मीनाक्षिसुन्दरेश्वरस्वामिसहायम् ॥

8172 On the last sheet is given:—

'बाबाजीनायकानां इदं पुस्तकम्'

॥ शिखरिणीमालास्तोत्रव्याख्या—
शिवतत्त्वविवेकः (समूलः)

8174. ŚIKHARIṆĪMĀLĀSTOTRAVYĀKHYĀ—
ŚIVATATTVAVIVEKAḤ.

Burnell's Catalogue No. 6898. Page 111. Left column.

Substance—Paper. Size—9½ × 4½ inches. Sheets—82. No. of Lines—10 to a Page. Script—Devanāgarī. Author—Appayyadīkṣita. Incomplete. Granthas—2275. Printed.

Beginning:

श्री गणेशाय नमः ।

शिवाय नमः ।

यस्याहुरागमविदः परिपूर्णशक्ते·
रंशे कियत्यपि निविष्टममुं प्रपञ्चम् ।
तस्मै तमालरुचिभासुरकन्धराय
नारायणीसहचराय नमश्शिवाय ॥

श्रीकान्तद्रुहिणोपमन्युतपनस्कन्देन्द्रनन्द्यादयः
प्राचीना गुरवोऽपि यस्य करुणालेशाद्गता वं ।
तं सर्वादिगुरुं मनोज्ञवपुषं मन्दस्मितालंकृतं
चिन्मुद्राकृतमुद्रपाणिनलिनं चित्ते शिवं कुर्महे ॥

End:

मू । तया संक्षिप्तोक्ता + प्रबलयति तमो हन्त सुधियाम् ॥

आत्मप्रबोधो परिषदि 'अथ यदिदं ब्रह्मपुरमिदं पुण्डरीकं' इत्यारभ्य 'शोकमोहविनिर्मुक्तं विशुं ध्यायन सीदति ।' इत्यनेन दहर... ।

Subject: Sivatattvaviveka, a commentary on the author's own work Sikhariṇīmālā.

Remarks:— The Ms. is in good condition.

The Śivatattvaviveka is Appayyadīkṣita's own commentary on his Śivastotra, in 64 verses, called Śikhariṇīmālā. It is in two parts, the first, Śrutyarthavicāra, establishing that Śiva is the Brahman proclaimed in the Vedas and the second, Upabṛmhanārthavicāra, establishing that the Purāṇas, Smṛtis, the Brahma Sūtras, and Āgamas proclaim only the greatness of Śiva.

The work has been published in the Advaita Mañjari Series, Kumbhakonam.

॥ शिखरिणीमालास्तोत्रव्याख्या— ॥ शिवतत्त्वविवेकः ॥

8175. ŚIKHARIṆĪMĀLĀSTOTRAVYĀKHYĀ— ŚIVATATTVAVIVEKAḤ.

S. S. Collections No. 17 a.

Substance—Palm leaf. Size—17 × 1 inches. Leaves—85. Lines—5 to 8 to a Page. Script—Grantha. No. of Granthas- 2500. Author—Appayyadīkṣita. Incomplete. Printed.

Beginning—Same as No. 8174.

End:

पदं यद्गच्छन्ति + परमन्दैवतमिति ॥ ६९ ॥

'तत्प्रसादाच्च यं राज्यं प्राप्ताः कौरवनन्दन' इत्युपक्रम्य

'कस्तां सेनां महाराज मनसापि प्रधर्षयेत् ।

द्रोणकर्णमुखैर्गुप्तां महेष्वासैः प्रहारिभिः ॥

ऋते देवान्महेष्वासात् बहुरूपान्महेश्वरात् ।'

तस्यै.............................. ।

Subject: Śivatattvaviveka 1-39 Ślokas.

Remarks—The Ms. is in a fairly good condition. The other work contained herein is

'विष्णुमहिम्नस्तोत्रम्'

॥ शिखरिणीमालास्तोत्रटीका—समूला ॥

8176. ŚIKHARIṆĪMĀLĀSTOTRAṬĪKĀ—SAMŪLĀ.

J. L. Collection No. 997.

Substance—Paper. Size—$12 \times 4\frac{3}{4}$ inches. Sheets—45. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—45 ?. Author—Rāma Sūri. Complete. Not printed.

Beginning:

शिवं विश्वेशानं सकलजगदाराध्यचरणं

प्रणम्य श्रीबालाध्वरिबुधमुदे स्वल्पवचनाम् ।

करोम्यप्पय्यार्यैः कृतशिखरिणीस्तोत्रविवृतिं

पदार्था यद्व्याख्यान्त्वयधियमुपेयुर्झटिति ताम् ॥

श्रीकावेरीतटनिकटभूकुम्भकोणाभिधाना-

द्ग्रामाद्गोविन्दपुरपदभाक् प्राक्प्रदेशे समस्ति ।

ग्रामस्तत्राखिलबुधनुताः सन्ति यज्ञेश्वरार्याः
तेषां शिष्यो रचयति कृतिं रामसूरिः सुधीष्टः ॥ २ ॥

श्रीमच्छिखरिणीमालां शिवसत्पदयोजनीम् ।
रामः कामयते टीकां नटराजपुरे स्थितः ॥ ३ ॥

भगवन्तः पदवाक्यप्रमाणज्ञाः आचार्याः अप्पयदीक्षिताः उमासहायस्य परमेश्वरस्य तुर्यब्रह्मणः शिवस्य विश्वाधिकत्वविश्वसेव्यत्वसकलफलदानस्वातन्त्र्यव्यवस्थापनपरषष्टिसङ्ख्याकशिखरिणीवृत्तपद्यसमुदायात्मकशिखरिणीमालापदाभिधेयस्तोत्रारम्भसमये श्रीगुरुमूर्त्युपहितशिवध्यानं मङ्गलं कुर्वन्तः ध्यानश्लोकं स्तोत्रादौ निबध्नन्ति ॥

'श्रीकान्तद्रुहिणोपमन्युतपनस्कन्देन्द्रनन्द्यादयः
प्राचीना गुरवोपि यस्य करुणालेशाद्गता गौरवम् ।
तं सर्वादिगुरुं मनोज्ञवपुषं मन्दस्मितालङ्कृतं
चिन्मुद्राकृतमुद्रपाणिनलिनं चित्ते शिवं कुर्महे ॥'

End:

विभक्तार्थं विश्वेश्वरमहिमपारायणमिदं
गभीरैर्मीमांसाद्वयनयनिबन्धैस्सुघटितम् ।
धिया किञ्चित्पूर्वापर(नय)विचाराविहितया
विचिन्वन्तस्सन्तः सुचिरमनुगृह्णन्तु विबुधाः ॥ ६७ ॥

अनेन श्लोकेन पूर्वापरपर्यालोचनपुरस्सरं स्तोत्रतात्पर्य

जानन्तु इति स्तोत्रार्थविचारार्थं प्रवृत्ताः सुधियः प्रार्थ्य-
न्ते ॥ ६७ ॥

इत्थं शिखरिणीमाला शिवसत्पद्योजिनी ।
टीका संक्षिप्य रचिता सुधिया रामशर्मणा ॥ १ ॥

गोविन्दपुरनामाप्ते ग्रामे कावेरतीरगे ।
सतां यज्ञेश्वरार्याणां शिष्यो रामः कृतिं व्यधात् ॥ २ ॥

आसेतोराहिमाद्रेर्विलसदतियशाबालयज्वार्यवर्यः
श्रीमद्राजाधिराजादुपगतसुमहामानसम्पत्तिभूषः ।
भूम्यां जेजेत्यशत्रुः सकलबुधमनःकैरवेन्दुर्दयालुः
तत्तुष्ट्यै रामशर्मातनुत शिखरिणीस्तोत्रवाक्यार्थटीकां ॥ ३ ॥

Colophon:

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदप्पय्यदीक्षितकृतशिखरि-णीमालास्तोत्रस्य द्रविडरामशर्मकृता पदयोजनिका नाम टीका सम्पूर्णा ॥

इदं पुस्तकं श्रीपरमशिवचरणपद्मभृङ्गायमाणचेतोमान्यादीक्षितपौत्रेण गङ्गाधरसूनुना वृकोपनाम्ना श्रीशिवदासेन महादेवेन शिवप्रीत्यै हेविलम्बिसंवत्सरे आषाढकृष्णद्वितीयायां चन्द्रवासरे शिवसन्निधौ तञ्जापुरे श्रीशिवप्रीत्यर्थं लिखितम् ॥

श्रीपरमशिवार्पणमस्तु ॥

Subject : Śikhariṇīmālāstotraṭīkā, known as—Padayojanikā; with the Mūla, 1-67 Ślokas.

Remarks—The Ms. is in a fairly good condition. Alternate sheets are sulphurated.

Rāma Sūri the author of this commentary on Appayyadīkṣita's Śikhariṇīmālāstotra, (on which the author himself has written the commentary, Śivatattvaviveka) is a native of Naṭarājapura. He is the pupil of one Yagñeśvara, living in Govindapura, a village near Kumbhakonam. Rāma Sūri wrote this ṭīkā called Padayojanikā, for the pleasure of one Bālādhvarin. The colophon calls the author Draviḍa Rāmaśarma.

॥ शिवाद्वैतनिर्णयः ॥

8177. ŚIVĀDVAITANIRṆAYḤ.

Burnell's Catalogue No. 9768. Page 111. Left column.

Substance— Palm leaf. Size—15¼ × 1¼ inches. Leaves—86. Lines—5 to a Page. Script—Telugu. No. of Granthas —1000. Author—Appayyadīkṣita. Complete. Printed.

Beginning :

श्रीकण्ठशिवाचार्याः
सिद्धान्तं निजगदुः शिवाद्वैतम् ।
तत्किं विशिष्टमभिमत-
मविशिष्टं चेति चिन्तयामोऽत्र ॥

End:

.........विशेषरूपापन्नस्य निखिलकल्याणगुणगणादि-
व्यमंगळविग्रहविशेषविशिष्टस्य मध्यमाधिकारिकर्तव्याभे-
दोपासनार्थमत्रमाधिधिकारिकर्तव्यस्य स्वामिभावोपास-

नार्थं च तस्य सर्व........शिष्यप्रतिपादकं श्रीकण्ठाचार्या-
णामेव भाष्यमुपादेयमिति सर्वं समञ्जसं ।

Colophon:

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतावेद्याचार्यश्रीविश्वजिद्याजि
....ध्वरिवरसूनोरप्पय्यदीक्षितस्य कृतिः श्री शिवाद्वैतनिर्णयः
सम्पूर्णः ॥

शिवाय परिपूर्णाय शीतलाय चिदात्मने ।
चित्तनाथाय नाथाय तेजसे ब्रह्मणे नमः ॥

ब्रह्मैवेदं जगत्सर्वं ब्रह्मणोऽन्यन्न किञ्चन ।
ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका ॥

शिवाय परमगुरवे नमः ॥

Subject: Śivādvaitanirṇaya.

Remarks:—The Ms. is in a fairly good condition. There is a transcript copy of this Ms. in this library.

The Śivādvaitavinirṇaya is an exposition in prose of the Śaiva doctrine of Śrīkaṇṭha, discussing whether the latter's Śivādvaita is Viśiṣṭa or Aviśiṣṭa.

The work has been edited with notes and Translation by Mr. S. S. S. Śāstri and published by the University of Madras, using also this particular Ms.

॥ चिद्विलासः ॥

8178. CIDVILĀSAḤ.

Burnell's Catalogue No. 9867 b.

Substance—Palm leaf. Size—$19\frac{7}{8} \times 1\frac{3}{8}$ inches. Sheets—2 (8-9). Lines—11 to a Page. Script—Grantha and Telugu. No. of Granthas—50. Author—? Complete. Not Printed.

Beginning:

प्रकाशशिवमूर्तिरेकिका
तद्विमर्शतनुरेकिका तयोः ।
सा हरस्य तनुरि(?)द्वनेचरा
पादुकासरणिरात्मनो गुरोः ॥ १ ॥

चित्रभानुशशिभानुपूर्वक-
त्रित्रिभेदनियतेऽस्य....ष्वनुः (?) ।
तत्तदात्मकतया विमर्शनं
तत्समष्टिगुरुपादुकादितः ॥ २ ॥

End:

या क्रियासमभिहारतः क्रिया
दर्शितात्र गुरुभावनादिका ।
सा विभेदलयभावनादिका-
भ्यस्यतां पराशिवैक्यसिद्धये ॥ ४० ॥

Colophon:

श्रीवाञ्छेश्वराय मङ्गलनायक्यै नमः । इति चिद्विलासः समाप्तः ।

अविघ्नमस्तु

Subject: Cidvilāsa a poem on Śaiva philosophy—1-40 Ślokas.

Remarks:—The Ms. is in good condition. The other works contained herein are:—

1. Anuttaratattvavimarśinīvṛtti 1—8
2. Tattvaprakāśa 9 & 10
3. Kāmakalāvilāsa 10—21

At the end of these there are 5 leaves containing some unintelligible matter.

Dr. Burnell does not notice the last two works and describes the Ms. in the Advaita section.

॥ चिद्विलासः ॥

8179. CIDVILĀSAḤ.

Burnell's Catalogue No. 12174 b. Page 208. Right column. Substance—Palm leaf. Size—17¼ × 1¼ inches. Leaves —2 (12-13). Lines—6 to a Page. Script—Telugu. No. of Granthas—45. Author—? Complete. Not Printed.

Beginning, end, colophon and subject—Same as No. 8178.

Remarks:- The Ms. is in a decaying condition. For the other works contained herein vide No. 12174 a.

॥ तत्त्वप्रकाशिका ॥

8180. TATTVAPRAKĀŚIKĀ.

Burnell's Catalogue No. 6401. Page 111. Left column. Substance—Paper. Size—11¾ × 4½ inches. Sheets—4. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—75. Author—Bhojadeva. Complete. Printed.

Beginning :

श्री गणेशाय नमः

चिद्घन एको व्यापी नित्यस्स ततोदितप्रभुः शान्तः ।
जयति जगदेकबीजं सर्वानुग्राहकः शंभुः ॥ १ ॥

नोदयति यन्न नश्यति निर्वा[दि]ति निर्वृतिं प्रयच्छति च ।
ज्ञानक्रियास्वभावं तत्तेजः शांभवं जयति ॥ २ ॥

End :

तत्त्वानामपि तत्त्वं
येनाखिलमेव हेलया कलितम् ।
श्री भोजदेवनृपतिः
व्यधत्त तत्त्वप्रकाशं सः ॥

Colophon :

यस्याखिलं करतलामलकक्रमेण
देवस्य विस्फुरति तेजसि तत्वजातम् ।
श्री भोजदेवनृपतिः सशिवागमोत्थं
तत्त्वप्रकाशमसमा(न)मिमं व्यधत्त[म्] ॥

तत्त्वप्रकाशं(:) समाप्तम्(:) ॥

हरिः ओम् । श्री वेङ्कटेशाय नमः ।

Subject : Tattvaprakāśikā.

Remarks:—The Ms. is in good condition.

The Śivatattvaprakāśikā or Tattvaprakāśa, is a work of the Royal polymath of the Pārmār dynasty. It is an authoritative Śaiva work in 6 Paricchedas. It has been commented

upon by the famous Aghora Śivācārya and by one Śrīkumāra. This Bhoja is a varied writer and is the author of many works on Sāṅkhya, Yoga, Vaidya and many other subjects. He is the same as the author of Campū Rāmāyaṇa and Sarasvatī Kaṇṭhābharaṇa. (Vide preface to detailed contents of Vol. XI)

The work has been published as No. 68 in the Trivandrum Sanskṛt Series with Śrīkumāra's commentary. This work is also ascribed to Sadyojyotis.

॥ तत्त्वप्रकाशिका ॥

8181. TATTVAPRAKĀŚIKĀ.

Not noticed by Burnell Ms. No. 6895 a.

Substance—Paper. Size—12 × 5 inches. Sheets—3. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—75. Author—Bhojadeva. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 8180.

Remarks:—The Ms. is in a decaying condition. The other work contained here is Śivatattvaprakāśikāṭīka. This work has not been noticed by Dr. Burnell under this number.

॥ तत्त्वप्रकाशिका ॥

8182. TATTVAPRAKĀŚIKĀ.

Burnell's Catalogue No. 6335. Page 611. Left column.

Substance—Paper. Size—$10\frac{1}{2} \times 5\frac{1}{2}$ inches. Sheets—4.

Lines—15 to a Page. Script—Telugu. No. of Granthas —75. Author—Bhojadeva. Complete. Printed.

Beginning, end and subject—Same as No. 8180.

Colophon:

तत्त्वप्रकाशिका समाप्ता ॥

Remarks:—The Ms. is in good condition. On the title page is given

श्रीमदीशानपरमसदाशिवशंकरस्वामिनां शिवतत्त्वप्रकाशप्रारम्भः ॥

॥ तत्त्वप्रकाशिकाटीका ॥

8183. TATTVAPRAKĀŚIKĀṬĪKĀ.

Burnell's Catalogue No. 6402. Page 111. Left column. Substance—Paper. Size—$11\frac{3}{4} \times 4\frac{5}{8}$ inches. Sheets—24. Lines—8-9 to a Page. Script—Devanāgarī. No. of Granthas—450. Author—Aghoraśivācārya. Complete. Printed.

Beginning:

शिवं प्रणम्य षट्त्रिंशत्......तसशक्तिकम् ।
व्याख्यां तत्त्वप्रकाशस्य स्फुटाल....करोम्यहम् ॥

अद्वैतवासनाविष्टैः सिद्धान्तज्ञानव(र्जितैः) ।
(व्याख्या)सोत्रान्यशास्त्रैर्यत् य(ततोऽ)स्माकमुद्यमः ॥

तत्र तावदाचार्यः प्रारिप्सितस्य प्रकरणस्य निर्विघ्नप-
रिसमाप्त्यर्थं सिद्धान्तशास्त्रप्र(वृत्तिनिमित्तं स)कलतत्त्वातीतं
निष्कलं परमशिवमाद्यया आर्यया स्तौति ।

End:

* *

श्री भोजदेवनृपतिः सच्छिवागमोत्थं
तत्त्वप्रकाशमसमानमिमं व्यधत्त ॥

यश्शास्त्रेषु शिवोदितेषु परमव्याख्यातृभावं गतः
सामान्येषु पदादिकेषु च सुधीः स्वाध्यायशिक्षोल्बणः ।
तेनाघोरशिवेन शैवतिलकैः संप्रार्थितेनादरा-
त्संक्षेपेण गुरूत्तमेन विवृ[ता]तस्तत्त्वप्रकाशः स्फुटम् ॥

Colophon:

इत्यघोरशिवाचार्यविरचिता तत्त्वप्रकाशवृत्तिः समाप्ता ॥

Subject: Śivatattvaprakāśikāṭīkā with text.

Remarks:—The Ms. is in an excellent condition. This Ms. seems to be a copy of the following one.

This commentary of Aghora Śivācārya on Bhoja's Tattvaprakāśa is published by the Śaivasiddhānta Paripālana Saṅgam at Devakottai along with his other commentaries on Tattvanirṇaya and Tattvasaṅgraha edited by N. Kṛṣṇa Śastri. For remarks see under No. 8187.

॥ तत्त्वप्रकाशिकाटीका ॥

8184. TATTVAPRAKĀŚIKĀṬĪKĀ.

Burnell's Catalogue No. 6895 b. Page 111. Left column. Substance—Paper. Size—12×5 inches. Sheets—13 (4-16). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—300. Author- Aghoraśivācārya. Incomplete, wants beginning. Printed.

Beginning:

...पि शिवप्रेरणयैव कर्तृत्वात् तथोक्तमिति अविरो-
धः । इत्थं प्रतिपदार्थभेदमाह— ' पशवस्त्रिविधा ज्ञेयाः ।'

End, colophon and subject—Same as No. 6402.

Remarks—The Ms. is in a too much decaying condition. The other work contained herein is Śivatattvaprakāśikā.

॥ तत्त्वप्रकाशिकाटीका ॥

8185. TATTVAPRAKĀŚIKĀṬĪKĀ.

Burnell's Catalogue No. 11389. Page 111. Right column. Substance— Palm leaf. Size—16½ × 1½ inches. Leaves—32. Lines—5 to a Page. Sript—Telugu. No. of Granthas—750. Author—Aghoraśivācārya. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 8188.

Remarks:—The Ms. is in a fairly good condition. At the beginning a few of the last verses of the text are given. Perhaps the text once existed completely at the beginning.

॥ तत्त्वप्रकाशिकाटीका—समूला ॥

8186. TATTVAPRAKĀŚIKĀṬĪKĀ—SAMŪLĀ.

Burnell's Catalogue No. 11411. Page 208. Right column. **Substance**— Palm leaf. Size—16½ × 1¾ inches. Leaves—28. Lines—6 to a Page. Script—Telugu. No. of Granthas—500. Author—Aghoraśivācārya. Incomplete. Printed.

Beginning—Same as No. 8183.

End:

संहारक्रमेण तत्त्वानि प्रदर्शितव्यानि । यथा-

'भूवाय्वग्निमरुत्खगन्धरसरूपस्पर्शशब्दाङ्गनं (?)

पायुःपादकरास्यनासिरसनादृक्त्वक्श्रुतिर्मानसम् ।

गन्धादिर्गुणमातरागपुरुषं विद्यानियत्याकला

कालोमोहकबोधकेश्वरसद (?)(सं)विच्चिमीडे शिवम् ॥'

इति । अत्र च रागपुरुषमिति वैपरीत्येन पुंसासाध्यत इति दर्शितं तत्त्वं भवति । यतो यत्कारणमारकश्च (?) तत्त्वस्य अकृतस्य करणकृतस्य परिवर्धनम् ।

Subject: Tattvaprakāśavyākhyā, with text. This Ms. needs only 4 lines to be complete. The last sheets containing those lines are found at the beginning of 8204, of which bundle this Ms. originally formed a part.

Remarks:—The Ms. is in a fairly good condition. The Ms. has been left by Dr. Burnell as an unidentified fragment.

॥ तत्त्वत्रयनिर्णयविवरणं—समूलम् ॥

8187. TATTVATRAYANIRṆAYAVIVARAṆAM—SAMŪLAM.

J. L. Collection No. 998.

Substance—Paper. Size—11 × 5 inches. Sheets—6 (5-10). Lines—11 to a Page. Script—Devanāgarī. No. of **Granthas**—200. Author—Aghoraśivācārya. **Complete**. Printed.

Beginning:

सिद्धानि यत्प्रसादात् इष्टानिष्टानि वाञ्छितान्यचिरात् ।
नत्वा शिवं विधास्ये तत्त्वत्रयनिर्णये वृत्तिम् ॥

तत्र तावदारब्धप्रकरणग्रन्थस्य अविघ्नपरिसमाप्त्यर्थं तत्प्रतिपाद्येनार्थेन विशेषयन् परमेश्वरमेव प्रणमति–
म् ॥ पुंभ्यः फलं विचित्रं ददाति संवीक्ष्य बन्धवैचित्र्यम् ।
स्वमहिम्नाऽनाद्युदयोऽनाथस्तो नमो नमस्तस्मै ॥

अनादिरुदयः सर्वविषयज्ञानक्रियाप्रकाशो निर्मलत्वेन यस्य स अनाद्युदयः ।

अत्र त्वाचार्यश्रीमद्रौरवसिद्धमर्थसद्भावं तत्त्वसंग्रहेण संक्षेपात्प्रकाश्य श्रीमत्स्वायंभुवसिद्धमनेन प्रकाशयति ।

End:

उक्तस्समासतोऽयं
तत्त्वत्रयनिर्णयश्च वृत्तिकृता ।
स्वायम्भुवस्य जडता-
मपनेतुमनादिकाम्पुम्भ्यः ॥

अनादिमलावृतज्ञानक्रियात्वाद्वैन्ध्यायिकादिपारिकल्पितां जडतामात्मभ्योऽपनेतुं तेषामविकारित्वाद्भोक्तृत्वाच्च नित्यचेतनत्वात्तद्वावारको मलस्तद्भावभाविनी मायातन्निवृत्तिप्रकारस्तन्निवृत्तिकर्ता शिवश्चात्र संक्षेपेण प्रतिपादित इति ।

श्रीमदघोरशिवाह्वयेन गुरुणा श्रीजन्यया व्याख्यया
लोकेऽपि प्रथितेन कुण्डिनकुलं चोलेष्वलङ्कुर्वता ।
श्रीसर्वात्मशिवाङ्घ्रिपद्मरजसामाराधकेनामला
श्रीतत्त्वत्रयनिर्णयस्य विवृतिर्लेशादियं निर्मिता ॥

Colophon:

इत्यघोरशिवाचार्यविरचिततत्त्वत्रयनिर्णयविवरणं सम्पूर्णम् ॥

Subject: Tattvatrayanirṇayavivaraṇam, a commentary on Tattvatrayanirṇaya of Sadyojyotis.

Remarks:—The Ms. is in a fairly good condition. On the title page is given—

'तत्त्वत्रयविवरणं भट्टगोस्वामीरङ्गनाथीयस्वम्' ॥

The other work contained herein is Nādakārikāvṛtti of Aghoraśivācārya.

This work with the text of Sadyojyotis has appeared along with this author's commentaries on Bhoja's Tattvaprakāśikā and Sadyojyotis' Tattva Saṅgraha, in an edition by N. Kṛṣṇa Śāstri under the auspices of the Śaivasiddhāntaparipālana Saṅgham, Devakottah. (Printed at Śrīrangam, 1923)

Aghoraśivācārya, the great Śaivācārya and the author of many works on Śaiva theology lived in the 12th century. Besides this work he is the author of many works like Sarvajñānottara, Āgamānhika and commentaries on many Śaiva and Āgama works.

The British Museum Catalogue of Printed books suggests by a double entry of the name of Aghoraśivācārya that there are 2 such Śaivācāryas. It qualifies the author of the Tattvaprakāśikā as 'Kauṇḍinya, of Coladeśa', differentiating him

from the author of the Āgama works. There is no evidence for this dualism. We have seen in Vol. XI of this catalogue that Bhoja and Aghoraśiva were authors of Yoga works. (Vide preface to detailed contents of Vol. XI). This lends also to the view of oneness of the authors.

From the works of Sadyojyotis, Aghora Śivācārya, and Bhojarāja we see they were written at a time prior to the Brahmasūtras being harnessed by Śrīkaṇṭha to prove Śaivādvaitā, because they were merely based on Āgamas. By that time Śaivism remained only as a Bhāgavata or Bhakti cult and did not attain the status of a distinct system of philosophy vying with Viśiṣṭādvaita. This accounts for the view that these works were prior in date to the Bhāṣya of Śrīkaṇṭha. This author is the disciple of Sarvajñaśivācārya.

॥ तत्त्वसङ्ग्रहव्याख्या—लघुटीका ॥

8188. TATTVASAṄGRAHAVYĀKHYĀ—LAGHUṬĪKĀ.

J. L. Collection No. 999.

Substance—Paper. Size—$11\frac{1}{4} \times 4\frac{3}{4}$ inches. Sheets—15. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—512. Author—Aghoraśivācārya. Complete. Printed.

Beginning:

श्री गणेशाय नमः ॥

पदवाक्यप्रमाणज्ञः सद्योज्योतिर्गुरूत्तमः ।
साक्षादिव शिवोऽस्माभिरलक्ष्यपतिवैभवः ॥

तत्त्वसङ्ग्रहचन्द्रस्य प्रकाशाय वितानिता ।
श्रीनारायणकण्ठेन बृहट्टीका शराभिधा ॥

तथापि खिन्नबुद्धीनां बृहट्टीकाप्रविस्तरे ।
हिताय लघुटीकात्र मयेयमुपरच्यते ॥

तत्र तावदत्रभवानाचार्यः परमशिवप्रणामपूर्वं प्रकरण-
करणं प्रतिजानाति ।

'चिदचिन्नेतारमजं सर्वज्ञं शङ्करं प्रणम्याहम् ।
मन्दमतिबोधहेतोस्तत्त्वानि वदामि संक्षेपात् ॥'

चितां बद्धात्मनामचितां च बिन्दुमायातत्कार्याणां ने-
तारमधिष्ठातारं साक्षात्परम्परया च शुद्धाशुद्धजगदुपादा-
नेनात्मनां यथार्हं— शुद्धाशुद्धभागप्रदमित्यर्थः ।

End:

अथ केनेदं प्रकरणं कृतमित्याह—
इत्यवदत्तत्त्वानि तु
सद्योज्योतिस्सुवृत्तिकृत् षष्टया ।
भगवानुग्रज्योति-
स्सर्वज्ञोऽयमनुजग्राह ॥

सुवृत्तिः सद्वृत्तिरिति रौरववृत्तेर्नाम तत्कर्त्रा इदं निर्मि-
तमित्यर्थः ।

श्रीमद्वेषक(त्खेटक)नन्दनार्ककिरणैस्सद्वृत्तिवाक्यात्मकैः
ध्वस्ताज्ञानतमश्च येन गुरुणाघोरादिना शम्भुना ।
तत्त्वज्ञानबुभुत्सुभिर्बुधवरैस्संप्रार्थितेनादरात्
तत्त्वानामिति संग्रहस्य विवृतिर्लघ्वी स्फुटा निर्मिता ॥

Colophon:

इत्यघोरशिवाचार्यविरचिता तत्त्वसंग्रहलघुटीका परिसमाप्ता ॥

Subject: Tattvasaṅgrahavyākhyā-Laghuṭīkā, with the text of Sadyojyotis by Aghoraśivācārya.

Remarks:—The Ms. is in a good condition. On the title page is given

'भट्टगोस्वामिरङ्गनाथीयम् ।'

Sadyojyoti is the Vṛttikāra, who has commented upon the Rauravāgama Sūtras. He has also written in addition two small works. His Tattvatrayanirṇaya follows the Svāyambhuva while his Tattvasaṅgraha is an epitome of the Raurava doctrines. Tattvaprakāśikā another similar Śaiva work is ascribed to him as also to Bhoja.

The famous Aghoraśivācārya, has commented upon both the works of Sadyojyotis as also upon Tattvaprakāśikā.

Besides the Laghuṭīkā of Aghoraśivācārya, there is a Bṛhaṭṭīkā on the Tattvasaṅgraha by Nārāyaṇa kaṇṭha, pupil of Rāmakaṇṭha, the author of the Nādakārikā etc.

The work has been published with Aghoraśivācārya's commentary by the Śaivasiddhānta paripālana Saṅgam of Devakotta.

॥ तत्त्वसंग्रहव्याख्या—लघुटीका ॥

8189. TATTVASAṄGRAHAVYĀKHYĀ—LAGHUṬĪKĀ.

Burnell's Catalogue No. 11409. Page 111. Right column.

Substance—Palm leaf. Size—18⅝ × 1¾ **inches**. Leaves—17 (37-53). **Lines**—6 to a **Page.** Script—Grantha. No. of Granthas—500. Author—Aghoraśivācārya. Incomplete. Printed.

Beginning:

कः पुनरत्र भोग्यं । को वा भोग इत्यत आह । बुद्धि-
र्विषयाकारा सुखादिरूपं समासतो भोग्यम् । भोग्ये भोगो
भोक्तुर्व्यक्तिभोग्यनिर्भासा...

End, colophon and subject—Same as No. 8188.

Remarks:—The Ms. is in good condition.

॥ भोगकारिकावृत्तिः ॥

8190. BHOGAKĀRIKĀVṚTTIḤ.

Burnell's Catalogue No. 11407 Page 111. Left column.
Substance—Palm leaf, **Size**—16 × 1½ **inches.** Leaves—48 (1-48). **Lines**—4 to a **Page.** Script—Telugu. No. of Granthas—1000. Author—Aghoraśivācārya. **Complete.** Not Printed.

Beginning:

शैवग्रन्थः । अघोरशिवाचार्यविरचितं भोगकारिका-
व्याख्यानम् ।

शिवं प्रणम्य सद्भोगमोक्षसम(?)मन्दचेतसाम् ।
हिताय लेशतः स्पष्टं व्याख्यास्ये भोगकारिकाम् ॥

इह हि तत्रभवाद्भिः सद्योज्योति....पादैः प्रकरण-

प्रतिपाद्यं भोगमोक्षात्मकमर्थं बोधयन्नित्रस्तथैवाविघ्नपरिस-
माप्त्यर्थं प्रथमं परमशिवनमस्कारः क्रियते ।

त्रिबन्धिचित्कलायोगभोगविश्लेषमोक्षदम् ।
सर्वकालक्रमोर्थक्यं प्रणम्याजं शिवं ध्रुवम् ॥

त्रयो वाधामलकर्ममायालक्षणास्ते विद्यन्ते येषां तेषां
त्रिबन्धनबन्धिनां सकलाख्यानां चितानामात्मनां यो +
सर्वकर्तृत्वश्च सूच्यते ॥

End:

विषयसङ्गिनां तु सकलानां पशूनामुद्भूतविविधस्वव्या-
पारा भवन्ति । विच्छिन्नाधाररूपा इति पाठे परस्परमुद्भा-
वाभिभवाभ्यां कदाचिद्विच्छिन्नरूपाः कदाचिच्चोदाररूपाश्च
भवन्तीत्यर्थः । इत्थं प्राक्प्रतिज्ञातयोः ससाधनयोः भोग-
मोक्षयोः साधकभोगस्तावे...दशभिः कारिकाभिः प्रदर्शि-
तः । इत्यत्रैव भोगप्रकरणोपसंहारः । मोक्षस्तु ससाधनः
प्रकरणान्तरे प्रदर्शयिष्यत इति शुभम् ॥

श्रीमत्खेटकनन्दनेन गुरुणा सिद्धान्तसिद्धं स्फुटं
संक्षेपादिति कारिकाभिरुदितो भोगः समं साधनैः ।
वाचस्तस्य समीक्ष्य वीततमसो घोरादिना शम्भुना
लेशाद्देशिक(कुं)जरेण विवृतिस्तासामिदं निर्मिता ॥

Colophon:

इत्यघोरशिवाचार्यविरचिता[या] भोगकारिकायाः वृत्तिः संपूर्णा ॥
श्रीगुरुभ्यो नमः ॥ श्रीमहागणपतये नमः ॥

Subject:. Bhogakārikāvṛtti, a Vṛtti on Bhogakārikā.

Remarks:—The Ms. is in good condition.

The Bhogakārikas seem to have been written by Sadyojyotis. Originally, it seems, that it is Sadyojyoti who wrote the 2 sets of Kārikās, called Bhoga and Mokṣa. Both Aghora Śivācārya and Rāmakaṇṭha Bhaṭṭa have commented upon them. A verse at the end of Mokṣa Kārikā Vṛtti mentions that Sadyojyoti was the author of both the Bhoga and Mokṣa Kārikās.

॥ नादकारिकावृत्तिः—समूला ॥

8191. NĀDAKĀRIKĀVṚTTIḤ—SAMŪLĀ.

J. L. Collection No. 1000.

Substance—Paper. Size—11×5 inches. Sheets—5 (1-5). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—125. Author—Aghorasivācārya. Complete. Not Printed.

Beginning:

श्री गणेशाय नमः ॥

नादातीतशिवं नत्वा नादज्ञानप्रसिद्धये ।
श्रीरामकण्ठरचितां व्याख्यास्ये नादकारिकाम् ॥

बुद्ध्यसितामनोभ्यो
विद्यातो रागतः कलायाश्च ।
मायापुंशक्तिभ्यो
नादोऽन्यो दृश्यतेऽध्वनिभ्योऽपि ॥

अस्मिता अहङ्कारः ततश्च बुद्ध्यादीनां मायान्तानां तत्त्वानां स्वकार्यैरेव सिद्धेः । कार्यान्तरहेतुत्वे च प्रमाणाभावात्पुरुषस्य तच्छक्तेश्चाधिकारित्वेन वाक्यसमवायायोगात् । ध्वनीनाञ्च स्थूलानां उत्पत्त्यपवर्गयोगित्वेन कारणान्तरापेक्षित्वादपि शब्देन तदुद्भूतानां वर्णानाञ्च क्रमभावित्वेनाभिधायकत्वानुपपत्तेस्तत्कारणत्वेन नादो दृश्यते प्रमाणेन निश्चीयत इत्यर्थः ।

स्थूलैश्शब्दैर्व्यक्ताः सूक्ष्मा नादात्मकास्ततो ध्वनयः ।

End :

मू ॥ वाच्यत्रिभिन्नं बुद्धिं
कुर्वन्तो वर्धयन्ति जनयात्रां ॥

व्या० । अनेनैव च क्रमेण मन्त्राः षड्धा अपि शिवादेः अर्थस्य अभिधायका भवन्तीत्युक्तं ।

मू० ॥ इति सनादसिद्धिमेतामकरोद् भट्टरामकण्ठोऽत्र ।
नारायणकण्ठसुतः काश्मीरो वृत्तपंचविंशत्या ॥

व्या० । श्रीमदघोरशिवाचार्यजन्मया परसंज्ञया ।
व्याख्याता नादसिद्धिश्च प्रार्थितेन गुरूत्तमैः ॥

Colophon :

इत्यघोरशिवाचार्यविरचिता नादकारिकावृत्तिः समाप्ता ॥

Subject : Nādakārikā Vṛtti by Aghora Śivācārya is a gloss on the Nādakārikā of Rāmakaṇṭha, with the text of Nādakārika in 25 Āryas.

Remarks:—The Ms. is in good condition. The other work contained herein is—Tattvatraya Nirṇaya Vivaraṇa of Aghora Śivācārya.

On the title page is given—

' भट्टगोस्वामिरत्ननाथीयं स्वं ॥ '

Rāmakaṇṭha, author of the Nādakārikas, on which Aghora Śivācārya has commented, has written many works in Śaiva theology, philosophy and Āgama.

We know of a Rāmakaṇṭha who has commented upon the Spandakārikās, which is a work on Kaśmīr Śaivism. A third Rāmakaṇṭha is the author of a Vṛitti on Mokṣakārikās of Sadyojyotis. From the date available so far it is not possible to speculate about the identity of these three authors. But it may be that this author of Nādakārikās is the same as the author of Mokṣa Kārikā Vṛtti. The other i. e. the commentator of Spanda Kārikas is distinctly different because he was the disciple of Utpaladeva.

॥ मोक्षकारिकावृत्तिः ॥

8192. MOKṢAKĀRIKĀVṚTTIḤ.

Burnell's Catalogue No. 11407 b. Page 111. Left column. **Substance**—Palm leaf, **Size**—16×1½ **inches**. Leaves—39. (49-87), Lines—4 to a Page. Script—Telugu. No. of Granthas—700. Author—Rāmakaṇṭha. **Complete.** Not printed.

Beginning:

याभ्यां प्रकाशितं वर्त्म सिद्धान्ते सिद्धभावतः ।

गुरूणामपि तौ वन्द्यौ सद्योज्योतिर्बृहस्पतिः ॥

भोगमोक्ष... ।

भोगमोक्षेषु संक्षेपाद्व्याख्यास्ये मोक्षकारिकाम् ॥

इह हि गुरुसिद्धान्तसंसिद्धौ भोगमोक्षौ ससाध........ भोक्तुर्भोगश्चित्तवृत्तिरित्यादिना भोक्तारश्च पशवः स्वतन्त्राः तेषाञ्च भोगसाधनं कार्यकरणादि ...स्वोपादानकारणञ्च मायाख्यं प्रतिपादितम् ॥

End:

शिवात्परंपरायातौ भोगमोक्षौ स (साधनौ) ।
आत्रेयाय मुनीन्द्रेण रुरुणा संप्रकाशितौ ॥

मन्दबुद्धिप्रबोधाय करुणाविष्टधीस्स्फुटं ।
सद्योज्योतिस्तु संक्षेपात् तावेतौ परि... ॥

......यामास भगवानीश........ ।
उग्रज्योतिर्गुरुः श्रीमान् सर्वविद्यासरित्पतिः ॥

गुर्वाम्नायतोऽविच्छिन्नस्मरणसन्ततेरेव परमेश्वरत्वेनैतत् प्रतीयते(?) सर्वश्रेयोहेतुरिति ।

..... नारायणकण्ठसूनुना रचिता ।
संक्षेपाद्वृत्तिरियं शिष्यहिता भट्टरामकण्ठेन ॥

Colophon:

इति श्रीनारायणकण्ठात्मज भट्टरामकण्ठकृत(मोक्षकारिकावृत्तिस्स)माप्ता ।

श्रीगुरुभ्यो नमः ॥

श्रीमहागणपतये नमः । श्रीवेङ्कटेशाय मङ्गलम् ॥

Subject: Mokṣakārikā Vṛtti, a Vṛtti on Mokṣakārikā of Sadyojyotis.

Remarks:—The Ms. is in good condition.

Bhaṭṭa Rāmakaṇṭha is the son of Bhaṭṭa Nārāyaṇakaṇṭha who is the pupil of another Rāmakaṇṭha, and the author of Mṛgendra Vṛtti etc. The author of the Mokṣakārikās is Bhagavān Sadyojyoti and also of the Bhoga Kārikās as the Śloka at the end of this Ms. shows. For further remarks about the author see under No. 8191.

॥ तत्त्वप्रकाशिका ॥

8193. TATTVAPRAKĀŚIKĀ.

Burnell's Catalogue No. 9887 c.

Substance—Palm leaf. Size—$19\frac{3}{4} \times 1\frac{5}{8}$ inches. Leaves—2 (9-10). Lines—10 to a Page. Script—Grantha and Telugu. No. of Granthas—45. Author—? Complete. Not printed.

Beginning:

तत्त्वप्रकाशिका ।

अकृत्रिमाहमामर्शप्रकाशैकघनः शिवः ।
शक्त्या विमर्शवपुषा स्वात्मनोऽनन्यरूपया ॥

शिवादिक्षितिपर्यन्तं विश्वं वपुरुदञ्चयन् ।
पञ्चीकृत्य महानाट्यरसिकः क्रीडति प्रभुः ॥

न च पार्थक्यवार्तापि व...विश्वशरीरयोः ।
न विश्ववपुषोभिन्ना भिन्नतास्त्यपि तात्त्विकी ॥

End :

इति षडधिकत्रिंशत्प्रभेदप्रोक्तजगत्तनुप्रवीरा शक्तिः ।
पर्यायचित्रमहापथि जयति बहुशस्पन्दाकारापराभिदनव-
पतद्वा निमीलन्तु जन्यहितप्रपस्वभावविजृंभितम् ॥

Colophon:

इति तत्त्वप्रकाशिका समाप्ता ॥

Subject: Tattvaprakāśikā.

Remarks —The Ms. is in a fairly good condition, For the other work contained herein see remarks under No. 8219. Dr. Burnell does not notice this work under this number.

Tattvapraāśikā, the work under notice seems to deal with the Spanda doctrines.

This work is different from that noticed under No. 8180.

॥ तत्त्वप्रकाशिका ॥

8194. TATTVAPRAKĀŚIKĀ.

Burnell's Catalogue No. 12174 b. Page 208. Right column.

Substance— Palm leaf. Size—17½×1½ inches. Leaves—3 (13-15). Lines—6 to a Page. Script—Telugu. No. of Granthas—45. Author—? Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 8193.

Remarks—The Ms. is in a fairly good condition, For the other works contained herein see remarks under No. 8179. This Ms. is full of scriptorial blunders. Dr. Burnell notes this number among the unidentified fragments.

॥ तत्त्वप्रकाशिका ॥

8195. TATTVAPRAKĀŚIKĀ.

Burnell's Catalogue No. 11388. Page 111. Left column. Substance—Palm leaf. Size—15 × 1½ inches. Leaves—100. Lines—7 to a Page. Script—Telugu. No. of Granthas—3000. Author—? Complete. Not printed.

Beginning :

श्रीगुरुबसवलिङ्गाय नमः ॥

श्रीगुरुलिङ्ग सदोदितघनमुखसार षट्पददलनामकपर-
शिव योगिमनोमन्दिर सन्यासंत....मिजगत्साक्षि रागविरा-
गविदूर निखिलभवरोगचिकित्सक बसवेश्वर गमनागमना-
दिविवर्जित कर्मफलप्रदायक जय सततं जय जय......

* *

श्लोक ॥

बकारं सत्तुरूपश्च सकारं चित्तुरूपकम् ।
आनन्दात्मा वकारं स्यात् त्रिविधं लक्षणं शिवे ॥ १ ॥

End :

न वक्तव्यमिदं शास्त्रं भक्तिहीनाय पाप्मने ।
नास्तिकाय........................ ॥

* *

सुखात्म जय जय ज्ञानसुभव आयकय (?) जय जय

सत्य सर्वमनमल जय जय जा... मम मायामय जय जय ।

कर्तृमत्प्रभुरूप गुरुबसवेश जय जयतु ॥

श्री गुरुलिङ्गाचा(र्या)यिने नमः ॥

Subject: Tattvaprakāśikā, with explanatory notes in Kanarese.

Remarks—The Ms. is in a fairly good condition. This is different from that given in Nos. 8180 & 8193.

॥ वेदार्थतत्त्वनिर्णयः ॥

8196. VEDARTHATATTVANIRNAYAH.

Burnell's Catalogue No. 9891. Page 111. Left column. Substance—Palm leaf. Size—$16\frac{3}{4} \times 1\frac{1}{4}$ inches. Leaves—154. Lines—6-8 to a Page, Script—Grantha. No. of Granthas—3500. Liṅgādhvarin. Incomplete. Not printed.

Beginning,

...जगत्कारणत्वं विष्णोरेव हिरण्यगर्भस्यैव जगत्कारणत्वं...सूर्यस्यैव जगत्कारणत्वं ।....

मैत्रेऽहनि ऐन्द्रं हविरिति शब्दप्रयोगादिन्द्रशब्दस्य मित्रपरत्वं मित्रशब्दवाच्यत्वं लोके वेदे च प्रसिद्धं । एवमाद्यु...व्युत्पत्त्या वरुणशब्देनापि सूर्यस्य सर्वव्यापकत्वेन सकलजगद्द्रष्टृत्वं प्रतिपाद्यते । अत एव सूर्यसूक्ते 'त्वं वरुण पश्यासि' इति । किं 'देवो याति भुवनानि पश्यन्' इति एवं योगशक्त्या सकलशब्दस्य सूर्यवाचकत्वं । किं च

सकलजगद्द्रष्टृत्वं सूर्यस्य । तथा च 'सविता प्रसवानामधिपतिः' इति 'असौ वै विश्वकर्मा योऽसौ तपति' इति च सकलविश्वनिर्माणकर्तृत्वं कौषीतकब्राह्मणे ।

End:

'पुरुषो वै रुद्रस्सन् महो नमो नमः' इति पुनः पुरुषात्मकत्वप्रतिपादनमनुपपन्नमिति चेन्न । 'पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्' इत्यादिना सर्वात्मकत्वं विष्णोः पुरुषसूक्ते प्रतिपादितं । तत्रैव 'तस्माद्विराडजायत' 'अजस्य नाभावध्येकमर्पितम्' इति श्रुत्यन्तरेण च सकलकारणीभूतहिरण्यगर्भजनकत्वं विष्णोः श्रुतं वर्तते । एवं परमेश्वरस्यापि...'देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः' 'हिरण्यगर्भं पश्यत जायमानं' 'यो देवानां प्रभवश्चोद्भवश्च' 'विश्वाधिको रुद्रो...' ।

Colophon Leaf No. 111.

इति श्रीमदद्वैतविद्याचार्यसान्निचित्यसर्वतोमुखातिरात्रसाग्निचित्याप्तवाजपेययाजि गोविन्दाध्वरीन्द्रतनयालिंगध्वरीन्द्रविरचिते वेदार्थतत्त्वनिर्णये प्रथमः परिच्छेदः ।

Subject: Vedārthatattvanirṇayaḥ, I-II Paricchedas.

Remarks—The Ms. is in a fairly good condition.

This work of one Liṅgādhvarin, son of a great Advaitic Scholar and Yājaka named Govindādhvarin, quotes profusely from the Karmakāṇḍa as well as the Jñānakāṇḍa and arrives

at the conclusion that the real object of the Vedic praises is Śiva or Rudra.

॥ शतरत्नसंग्रहः—सव्याख्यः ॥

8197. SATARATNASAṄGRAHAḤ- SAVYĀKYAḤ.

Burnell's Catalogue No. 11404. Page 108. Left column. Substance—Palm leaf. Size—10 × 1½ inches. Leaves—98. Lines 5 to a Page. Script—Telugu. No. of Granthas—2200. Author—Umāpati Śivācārya, Complete. Not Printed.

Beginning:

वन्दे कुन्देन्दुधवलदन्तामिभान्तरायकम् ।
दानधारापतद्भृङ्गसङ्गतं कुञ्जराननम् ॥

श्रीमदभ्रसभामध्ये नित्यमानन्दताण्डवम् ।
कुर्वाणमुमया देव्या सेव्यमानं शिवं भजे ॥

कालादितत्त्वपरिणामधुरीणमाया-
विक्षोभकस्फुरदनन्तनियोगधुर्यः ।
शुद्धाध्वजन्मपटुबिन्दुविजृम्भकारि-
पाशान्विमोचयतु नः परमेश्वरोऽयम् ॥

चिदम्बरे कल्पमठः शिवः श्री-
रुमापतिर्नाम शिवागमज्ञः ।
स्वयंभुनिश्वासमतङ्गदेव्या
मतं मृगेन्द्रं किरणं पराख्यम् ॥

श्रीदेविकालोत्तरविश्वसारं
ज्ञानोत्तरं वीक्ष्य दशापि चैकम् ।
साराणि सूत्राणि शतं गृहीत्वा
चकार बन्धं शतरत्नरूपम् ॥

कर्णभूषणयोग्यानामागमज्ञानशालिनाम् ।
अमीषां शतरत्नानामुल्लेखः क्रियते मया ॥

एषाञ्च सूत्राणां रत्नत्वं राजसाद्भुक्तिमुक्तिरागोत्पाद-
कत्वात् इष्टविधानाच्च । यथा रत्नत्रये—
'राजसात्सर्वतत्त्वेषु रागादिभ्योऽधिकारयोः ।
रत्नानीष्टविधानाच्च बिन्द्वाद्याश्शिवशासने ॥" इति

इह जगति कलिकालावेशात् आगमार्थे लुप्ते, पाषण्ड-
मताभिवृद्धौ सत्यां, गुरुशिष्यक्रमे च संकीर्णे स्वशिष्यान-
नुग्रहीतुकामः परमकारुणिकोमापतिशिवाचार्यस्तावद-
खिलागमज्ञानकाण्डसारभूतं संसारपाशसंतानितानां पशूनां
पशुत्वनिवृत्तिशिवत्वाभिव्यक्तिहेतुज्ञानदीक्षास्वरूपविवेच-
कसिद्धान्तनिर्णयं सूत्ररत्नशतं सञ्जग्राह । तस्य संग्र-
हस्य सद्योज्योतिःपादरामकण्ठनारायणाघोरशिवा-
दिव्याख्यानुसारेणास्मद्गुरुसंप्रदायानुसारेण च व्याख्या
क्रियते ।

सा च व्याख्या पञ्चलक्षणात्मिका । तथा लक्षणसंग्रहे ॥
" पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ।

आक्षेपोक्तिसमाधानं व्याख्यानं पञ्चलक्षणम् ॥" इति

तत्र प्रथमग्रन्थादभीष्टदेवतानमस्कारस्य वस्तुनिर्देशस्य च वक्तव्यतयाऽयं संग्रहकारस्तादर्थ्येन स्वार्थं सूत्रं प्रथमं गृह्णाति ।

॥ मू ॥

शिवं प्रणम्य परमं निश्वासमतः परम् ।
ज्ञानदीक्षे प्रवक्ष्यामि ते शृणुध्वं समाहिताः ॥

End:

इत्थं पतिपशुपाशस्वरूपनिरूपणद्वारेणात्मनः केवलसकलशुद्धावस्थात्रयं प्रतिपाद्य कस्यास्य ज्ञानशास्त्रस्याधिकार्यनधिकारिविवेकं निश्वासकारिकायां प्रदर्शयति ।

'प्रकटयस्वेदं ज्ञानं मद्भक्तानां वरानने ।
रक्षणीयं प्रयत्नेन तस्करेभ्यो धनं यथा ॥' इति

हे वरानने देवीसंबोधनमेतत् इदं ज्ञानं ज्ञायन्ते पदार्थाः योऽनेनेति । ज्ञानं शास्त्रं । तथा वायव्ये ।
'ज्ञानं वस्तुपरिच्छेदो वस्तु च त्रिविधं स्मृतम्' इति ।
मद्भक्तानां मद्भजनवतां प्रकटयस्व प्रकाशय ॥

दयाशान्तियुक्तानां देवाग्निगुरुभक्तानामस्मिन् ज्ञानशास्त्रे अधिकार इत्यर्थः । तथा तत्तन्त्रे ।

"देयं शान्ताय दान्ताय शिवभक्तिरताय च ।
शिववन्मन्यते यस्तु आचार्यं तत्त्वपारगम् ॥"

शिवाद्गुरुतरी भक्तिर्यथा नित्यं गुरोः सदा ।

तस्य देयमिदं ज्ञानं वृथा तु न कदाचन ॥

कालोत्तरे ।

"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
नान्यशास्त्रे यथाशक्तिर्ज्ञानं तस्मिन्नु दापयेत् ॥"

तथा सर्वज्ञानोत्तरे ।

'गुरुदेवाग्निभक्ताय नित्यं भक्तियुताय च ।
.....पीदं शास्त्रं नेतरेभ्यः प्रदापयेत् ॥'

इति । अस्य ज्ञानस्यानधिकारिलक्षणमाह । रक्षणीयमित्यादि । यथा लोके जनाः तस्करेभ्यः चोरेभ्यः सकाशात् धननिक्षेपा......यत्नेन प्रयासेन पालयन्ति तथा ज्ञानसाधनं चोरेभ्यः अभक्तादिभ्यः सकाशादिति प्रयासेन गोपनीयमित्यर्थः । तथा तत्तन्त्रे—

'इदं देवि न दातव्यं ज्ञानसद्भावमुत्तमम् ।
दुर्विदग्धे शठे क्रूरेऽप्यन्यायपथवर्तिने ॥' इति ॥

सर्वज्ञानोत्तरे ।

एतत्ते शिवसद्भावं शिववक्त्राद्विनिर्गतम् ।

गुह्याद्गुह्यतमं गुह्यमूहनीयं प्रयत्नतः ॥

नाशिष्याय प्रदातव्यं नापुत्राय कदाचन ॥ ॐ ॥

Colophon:

इति उमापतिशिवाचार्यसंगृहीतशतरत्नसंग्रहोल्लेखिनी समाप्ता ॥

Subject: Śataratnsaṅgraha with commentary 1-100 Sūtras.

Remarks:—The Ms. is in a good condition. Only 1-19 Sūtras

are numbered. The text also is given herein.

Umāpati Śivācārya, who lived at Cidambaram, wrote a centum of Sūtras, embodying the substance of Mataṅga, Mṛgendra, Kiraṇa, Devikālottara, Viśvasāra and Jñānottara Āgamas. The Sūtras of Umāpati are of philosophical interest in the main, dealing as they do about the triad of Pati, Paśu and Pāśa and the 'Paśutvanivṛtti' and 'Śivatvābhivyakti'. Jñāna Dīkṣā is also treated in it.

The commentator does not disclose his name. According to his own introductory remarks, we are to take that these Sūtras of Umāpati Śivācārya have the commentaries of Sadyojyotis, Rāmakaṇṭha, Nārāyaṇa and Aghora Śivācārya also.

Umāpati Śivācārya has written many Śaiva works in Tamil. 17 of his Tamil works are available in this library. Vide Index of Authors, Vol. III. Catalogue of Tamil Mss. in the Tanjore Library.

॥ शिवतत्वरत्नकलिकाव्याख्या—समूला ॥

8198. ŚIVATATTVARATNAKALIKĀVYĀKHYĀ—SAMŪLĀ.

Burnell's Catalogue No. 9840. Page 111. Left column. Substance—Palm leaf. Size—$18\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—282. Lines—9 to a Page. Script—Grantha. No. of Granthas—8000. Author—Kṛṣṇānanda Sarasvati. Complete. Not Printed.

Beginning:

वागीशायाः सुमनसः सर्वार्थानामुपक्रमे ।

यं नत्वा कृतकृत्याः स्युः तं नमामि गजाननम् ॥

श्री गुरुचरणाभ्यां नमः ॥

अखिलभुवनजन्मस्थेमभङ्गं यतो यो
मथितविधिमहर्षिर्विश्रुतो वेदमौलौ ।
स भवतु परमात्मा संविदानन्दसत्ता
मम मतिगतिसाक्षी मंगलाय ध्रुवाय ॥

❀ ❀

सौजन्यजन्ययशसामुदयालवालं
शीलोर्मिलामलदयामृतसिन्धुबन्धुम् ।
विज्ञानकल्पतरुदोहददिव्ययोगं
श्री वासुदेवयमिपुंगवमानतोऽस्मि ॥ ४ ॥

तुंगीकुर्वन्नतजनयशोवैदुषीरुत्तरंगैः
रंगी साक्षादुपशमसुधास्यन्दनिर्याससारः ।
श्रीमानेकस्सकलजगतीदेशिकः सद्गुणानां
सीमा भूमेर्जयति भवुकं रामभद्रो यमीन्द्रः ॥ ५ ॥

सहस्रांशोरिन्दोरपि सह कृशानोरसुलभः
प्रकाशो यस्यैव स्वयमनितराधेयमसु(धु)रः ।
त्रिलोकीनिर्मोक्षव्रतविहितदीक्षापरिकरं
प्रपद्ये मुक्ताख्यासुरभिकमसुं श्रीपरगुरुम् ॥ ६ ॥

पद्यैश्शतेन परमेश्वरसंस्कृतिर्या
पादाधिकेन कलिता परतत्वसारा ।

श्री तत्त्वरत्नकलिकेति मुदे बुधानां
आमोदस्त्वनमिदं जनयामि तस्याः ॥ ७ ॥

शास्त्रेषु दुर्गमतमेषु महामतीनां
अन्तः कथं मृदुधियामवगाहतां धीः ।
तेषामिहाभिलषितां परतत्त्वविद्यां
श्रीतत्त्वरत्नकलिकासुगमोऽभ्युपायः ॥ ८ ॥

इह खलु हिरण्यगर्भादिपुत्त्रिकान्ततनूपादानपरित्यागलक्षणजननमरणमहावर्तपरंपरापरिवर्तसुदुस्तरसंसारसाराक्षारसागरनिस्तारणीं ब्रह्मात्मविद्यादृढतरणिमतिसुगमोपायेनाभिलषतामखिलवेदैदंपर्यावेदनामोदमेदुरामनतिशयानन्दस्वरूपाववोधनमकरन्दनिर्भरां श्री शिवतत्त्वरत्नकलिकाख्यां परशिवस्तुतिस्रुपचिकीर्षुः प्रकरणप्रतिपाद्यकार्थजातं संक्षेपतो दर्शयन् परतत्त्वानुसन्धानलक्षणं मंगलमाचरत्याद्यपद्येन—

मू ॥ 'यस्याववोधनफलः सकलोऽपि वेदो
यस्मिन् मनोवचनवृत्तिरदूरवृत्त्या ।
यो विश्वकारणगुणोपाधिपारभूमिः
तं त्वामनन्यमहमीश्वर संश्रयामि ॥'

End. (P. 231 back).

मू ॥ श्री रामभद्रयोगीन्द्रचरणाम्बुजरेणुना ।
श्रीतत्त्वरत्नकलिका कृष्णानन्देन निर्मिता ॥

ण्या ॥

अत्र श्रीशब्देन वेदा विवक्ष्यन्ते 'ऋचः सामानि यजूंषि सा हि श्रीरमृतासतां' इति हि श्रूयते । रामभद्र इति योगीन्द्रः रामभद्रयोगीन्द्रः इति मयूरव्यंसकादित्वात्समासः ॥

* *

दृष्टप्लुष्टमनङ्गमङ्कुरयता येनापुनर्मङ्कुरं
तार्तीयीकविलोचनं द्रढयति व्रीडानतं मीलनम् ।
तन्निस्सीमदयातरङ्गशिशिरापाङ्गश्रि(?) तुङ्गस्तनं
पश्यत्फालभुवस्तुरीयनयनं पायादपायाच्चिरम् ॥

Colophon:

इति श्री शिवतत्त्वकलिकाव्याख्यायामामोदरंजनाख्यायां कैवल्यवासनोल्लासः पञ्चमः ॥

श्री शिवतत्त्वकलिकामोदरञ्जनं समाप्तम् ॥

श्रीसांबशिवार्पणमस्तु ।

बिंदु + सज्जनाः ॥

श्रीबालकृष्णानन्दसरस्वतीचरणयोः कुर्वे प्रणामान् बहून् । सूर्यनारायणभट्टर् पुत्रन् रामकृष्णन् स्वहस्तलिखितम् ।

Subject: Śivatattvaratnakalikāvyākhyā, otherwise known as Āmoda Rañjini, with the text of Śivatattvakalikā. I-V Ullāsas.

Remarks:—The Ms. is in good condition.

Kṛṣṇānanda Sarasvatī (17th century A. D.), the author of

this work, is identical with the author of the Vedantic work, Siddhānta Siddhāñjana, (No. 7519. Vol. XIII),

The author first wrote a Stotra on Śiva in 100 Vasantatilaka verses and then added to it this commentary called Śivatattva-Ratnakalikā, explaining the stuti according to Śaivādvaita. For further details see remarks under No. 6804 and preface to the detailed contents of Vol. XII.

॥ शिवतत्त्वरत्नकलिकाव्याख्या—समूला ॥

8199. ŚIVATATTVARATNAKALIKĀVYĀKHYĀ—SAMŪLĀ.

Burnell's Catalogue No. 9839. Page 111. Left column. Substance— Palm leaf. Size—$18\frac{1}{2} \times 1\frac{1}{2}$ inches. Leave—276. Lines—7-11 to a Page. Script—Grantha. No. of Granthas—8000. Author—Kṛṣṇānanda. Complete. Not printed.

Beginning, end and subject—Same as No. 8198.

Colophon:

इति श्री + समाप्तम् ।

श्रीकृष्णानन्दयोगीन्द्रचरणांबुजरेणुना ।
लिखितं पुस्तकमिदं श्रीनारायणशर्मणा ॥

ओं श्रीराम(भद्र)...... ...

............दा कलितेन सद्यः ।

षड्दर्शनीपरिवृढा भुवि धन्यधन्याः
विस्मापयन्ति विदुषो वचसां विलासैः ॥ २ ॥

व्यासपतञ्जलिजैमिनिकपिलमुनिकणाद... ।

..................य रामभद्रगुरून् ॥ २ ॥

Remarks:—The Ms. is in a decaying condition.

॥ शिवतत्त्वरत्नकालिकाव्याख्या—समूला ॥

8200. ŚIVATATTVARATNAKALIKĀVYĀKHYĀ—SAMŪLĀ.

Burnell's Catalogue No. 9838. Page 111. Left column.

Substance—Palm leaf. Size—$16\frac{1}{4} \times 1\frac{1}{2}$ inches. Sheets—84. Lines—7-8 to a Page. Script—Grantha. No. of Granthas—2000. Author—Kṛṣṇānanda Sarasvatī. Incomplete. Not Printed.

Beginning—Same as No. 8198.

End,

मू ॥

इति परमरहस्यं पण्डिताखण्डलानाम्

विमलमति विमृश्यं वेदतात्पर्यवृत्त्या ।

परमशिवपदस्योदस्य मानान्तराणि

प्रसवमुदितमाद्ये वेदवेद्यत्वमस्मिन् ॥

इति श्लोपसंहारार्थः । परमशिवपदस्य बाह्यकरणोपपादनीयधर्माराध्यत्वमेवतावद्रहस्यम् ।

* *

इदं प्रकरणं शिवतत्त्वरत्नकलिकेति संज्ञया कलिकात्मना रूपितं । कलिका च नाम स्तबकः 'कलिका स्तबकेऽपि च' इति कश्चिद्दृश्यते । स च बहुप्रसवसमुदायः ।

तदौचित्यात्स्ववक्रूपितप्रकरणावयवस्य प्रश्नरूपेण नि-

र्देश इति सर्वमवदातम् ।

Colophon :

शिवरत्नतत्त्वकलिकाव्याख्यायां आमोदरञ्जनाख्यायां प्रथमोल्लासः ।

Subject: Śivaratnatattvakalikāvyākhyā, known as Āmodarañjana with texts; First Ullāsa.

Remarks:—The Ms. is in good condition,

The scribe has given the following verse in the beginning.

कामक्रोधादिदूराय कल्याणगुणशालिने ।

कृष्णानन्दसरस्वत्यै करवै गुरवे नमः ॥

There is a Transcript copy of the Ms. in the Library.

॥ शिवयोगप्रदीपिका ॥

8201. ŚIVAYOGAPRADĪPIKĀ.

Burnell's Catalogue No. 9666 c. Page 112. Right column. Substance—Palm leaf. Size—15 × 1½ inches. Leaves—13 (60-72). Lines—7 to a Page. Script—Telugu. No. of Granthas—850. Author—Sadāśivayoginātha. Complete. Not printed.

Beginning:

विमलयोगिमनोम्बुजषट्पदं

त्रिविधकारणकारणमव्ययम् ।

सगुणनिर्गुणतत्त्वमनामयं

गुरुसदाशिवलिङ्गमहं भजे ॥

श्रीमद्गुरुप्रसादेन योगं ज्ञात्वा शिवात्मकम् ।
वक्ष्यामि सुप्रबोधाय शिवयोगप्रदीपिकाम् ॥

शिवतत्त्वविदां श्रेष्ठ वक्ष्यामि शृणु तेऽधुना ।
शिवयोगं परं गुह्यमपि त्वद्भक्तिगौरवात् ॥

End :

अहो ... हायोगसमाधिरेष
विनाशयेत्कर्म शुभाशुभं तथा ॥

... यं योगसमुच्चतोवनीतरेयात्यन्तराथापदं (?) ।
शिवमेकं समुपेत्य शाश्वतसुखं तत्रानुभूय स्वयम्
अभिजायेत मतस्सतां श्रुतिमतामस्मिन् कुले योगिनां ॥
स तु संप्राप्य ....शिवाख्यं परम् ।
ब्रह्मणि परे हृदयं यस्य तु विलीनं तस्य पितराविहा-
परत्र चरितार्थौ ॥
तस्य कुलजाः स्युरनघा जगति सव्ये तस्य पदघटि-
तभूरपि पविता ॥
योगशास्त्ररहस्यार्थसिद्धा सिद्धान्तपद्धतिः ।
....कृपालोद्य शिवयोगप्रदीपिका ॥

अभ्यासशूराय जितेन्द्रियाय
शिवे नुका(?)भक्तिसुनिश्चलाय ।

देयं रहस्यं शिवयोगशास्त्रं
यो मूढदाता गुरुपातकी स्यात् ॥

Colophon:

इति पञ्चमी पटलिका ॥

Subject. Śivayogapradīpikā, 1-5 Patalas, a Vīra Śaiva work.

Remarks:—The Ms. is in a decaying condition. There is a transcript copy of this Ms. in this library.

This work elaborately deals with Yogic practices etc, to attain the grace of Śiva and final release. The author is a writer on Vīra Śaivaism. This work is published along with some other Śaiva treatises of Sadāśivabrahmendra in Ānandāśrama Sanskrit series with a preface by Kāśinātha Bāla Agāśe. This work is also published along with word for word Kannada translation at Mysore in the Vīraśaiva Grantha Prakāśika Granthāvlī. It is otherwise called Śivayogadīpikā, and the author is also known as Chenna Sadāśiva Yogin.

॥ शिवयोगप्रदीपिका ॥

8202. ŚIVAYOGAPRADĪPIKĀ.

Not noticed by Burnell Ms. No. 15683.

Substance—Palm leaf. Size—$9\frac{3}{4} \times 1\frac{1}{4}$ inches. Sheets—4 (17-20). Lines—7 to a Page. Script—Telugu. No. of Granthas—30. Author—Sadāśivayoginātha. Incomplete. Printed.

Beginning:

श्री गुरुभ्यो नमः ।

ओंकारं वदनं देवि नमस्कारं भुजद्वयं ।
शिकारं देहमध्यस्थं वाय कण्ठं पदद्वयम् (?) ॥ १ ॥

इति पञ्चवर्णरूपं च भक्तरूपो मयोदितं ।
पिङ्गमध्ये भवेन्मन्त्रं मन्त्रमध्यपिङ्गं भवेत् (?) ॥

पिङ्गमन्त्रोभयोरैक्यं............शाङ्करी ।

End:

तद्यथा शृणु हे विद्व्यादौ रेचककुम्भकं ॥ २१ ॥
निःश्वासोच्छ्वासरूपेण रेकपूकौ स्वभावतः ।

Colophon: (leaf 19)

इति सदाशिवयोगिनाथविरचितायां योगशास्त्रे शिवयोगप्रदीपिकायां आभ्यन्तरपूजाविधिर्नाम प्रथमपटलिका ।

Subject: Śivayogapradīpikā Patala 1—According to the marginal notes on leaf 17—the subject is—

वीरशैवनिजलिङ्गैक्यमूर्तिस्थापितसमाधिलक्षणविधिः ॥

Remarks:—The Ms, does not seem to be a single one, Parts of various Mss. seem to have been mixed up pell-mell. As a whole, it can be broadly described under the vague caption 'वीरशैवविषयाः ।' The major portion of the Ms. seems to represent the Śivayogapradīpikā, written by Sadāśivayoginātha, The several chapters of this work itself are scattered. The Ms. is full of scriptorial blunders.

The other works contained herein are:—

१ वीरशैवविषयः । शिवोत्कर्षः ।

२ भैरवस्तुतिः

३ पञ्चेन्द्रियप्रकरणं

४ पञ्चमुखस्तोत्रं

५ गुरुस्तोत्रं

६ शैवश्लोकाः

७ मङ्गलाष्टकं

८ शिवसहस्रनाम

९ चिकित्सासंग्रहः

१० महिम्नस्तोत्रं of पुष्पदन्त

११ भृङ्गराजकल्पं (वैद्यग्रन्थः)

१२ क्षेत्रपालभैरवाष्टकं

१३ अन्तरङ्गचतुरङ्गविधानं

१४ पञ्चीकरणतत्त्वम्

१५ ऋष्यमन्त्रः

१६ नीतिश्लोकाः

१७ प्रसादमाहिमा ।

१८ नानाश्लोकाः

१९ प्रासादश्रुतिः

२० महावाक्यलक्षणम्

॥ शिवोत्कर्षप्रकाशः ॥

8203. ŚIVOTKARṢAPRAKĀŚAḤ.

Burnell's Catalogue No. 6396. Page 111. Left column. Substance—Paper. Size—$8\frac{1}{2} \times 2\frac{1}{2}$ inches. Sheets—62 (2-63). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1140. Author—Bālakriṣṇabhaṭṭa. Complete. Not printed.

Beginning:

... .बालकृष्णस्य निर्मितिः ।
शिवोत्कर्षप्रकाशाख्या तुष्टयै भूयात्सतां सदा ॥

अनायासेन सद्युक्तिमुक्ताश्रेवेतुमिच्छति ।
तदा शिवोत्कर्षकृती कलया........वर्तिनी ॥

इह खलु भेदाभिमानिनः केचित्पाषण्डाः परमशिवस्य कर्त्रादिविष्णोर्मा...तत्स्वामित्वादिरूपं परब्रह्मत्वमाहुः । तन्निरासाय श्रुतिस्मृतिपुराण...विषयव्यावहारिकपराशिवोत्कर्षप्रतिपादनपूर्वक... ।

End:

शास्त्रयोनित्वात् ॥ शास्त्रं.. योनित्वाद्ब्रह्म सर्वज्ञमित्यर्थः ।

एवमेवाध्यायचतुष्टये......करणेषु परेषां स्वस्य च र·

चना बोध्येति...विभाव्यतामयं सङ्क्षिप्य सङ्गृहीत.... ।

Colophon: (Sheet 31)

इति श्रीरङ्गोजिभट्टात्मजबालकृष्णभट्टविरचिते शिवोत्कर्ष-
प्रकाशे प्रथमोल्लाससमाप्तः ।

Subject: Śivotkarṣaprakāśa I-IV Adhyāyas.

Remarks:—The Ms. is in a decaying condition. There is a transcript copy of this Ms. in this library.

With profuse quotations from the Upaniṣads down to the minor pūraṇas, this work establishes that Śiva is the Brahman of the Upaniṣads and that He is the Supreme God. Towards the end of this Ms. we have a commentary on the Catussūtrī of the Brahma Sūtras from the points of view of Śaṅkara and Śrīkaṇṭha. In the lengthy discussion forming the main part of the work, all other Vedāntic Ācāryas are cited and criticised

The father of this author Raṅgojibhaṭṭa is different from his namesake, the brother of the famous Bhaṭṭojidīkṣita.

॥ शैवतत्त्वामृतम् ॥

8204. ŚAIVATATTVĀMṚTAM.

Burnell's Catalogue No. 9852. Page 111. Left column.

Substance—Palm leaf. Size—16 × 1 inches. Leaves—252. Lines—6-7 to a Page Script—Grantha. No. of Granthas—8000. Author—Vairāgyaśiva. Incomplete. Not Printed.

Beginning:

श्री महागणपतये नमः

श्रीदक्षिणामूर्तिशिवाय नमः ।

श्रीकण्ठाख्यशिवादिक्षितिचरमत... हृतैस्तत्त्वभेदै

ष्षट्त्रिंशद्भिर्विप...दुदयतिरोभावमुख्यान्विहारान् ।

पञ्चास्यः प्रौढमोहाञ्चनमदकरिणो वृत्तषाड्गुण्यभूमा

सोऽयं सौराष्ट्रसोमेश्वर....महिमा कोऽपि वः श्रेयसे स्यात् ॥

मिषान्निटिलमुल्लसत्कटकमुन्मदच्युत्कटं

निजार्धवपुषा परिग्रहवतोऽवतीर्णं विभोः ।

अदक्षिणबलादुमायतनरन्ध्रयानाकरं (?)

...वपुषि कुञ्जरं शिरसि तं भजे निर्जरम् ॥ २ ॥

अत्र श्रीमति विश्रुता जनपदे कर्णाटके श्रीकरी

विद्यारण्यपुरी श्रुतान्विह बुधात्रस्थावरस्थावरौ ।

श्री वैराग्यशिवार्य...मनुयोरन्यं........

....स्वामिनमामनन्ति मुनयः प्रोत्तुंगभद्रेशयोः ॥ ३ ॥

धन्यं नैककलाधर समदृश धृष्ट्या स्मरत सदा

रक्षन्तस्तृणता धियं बुधकृते मेरौ दधानं मुदा ।

सर्व..............................प्रदम्

श्री वैराग्यशिवार्यवर्यमनघं शंसन्ति सन्तः शिवम् ॥ ४

तं कूटस्थगुरुं प्रणम्य तदनु प्रेङ्खद्यशःकुन्तलं

प्रख्याताय नमस्करोमि गुर(वे)... ।

................नहुरावर्षेण कर्णाटका-
स्थाने...कृतभूतिना वत पराभूतिर्विदीर्णा द्विषां ॥ ५ ॥

मार्गं न क्वापि यान्ती क्वचिदपि न मनाङ्निम्नमार्गस्पृशन्ती
भीष्मं नोत्पादयन्ती.......................यान्ती ।
नान्तःपङ्कं वहन्ती न च समयवशाद्वृद्धिमुत्सारयन्ती
खड्गागवस्य विश्वं विशदयति नमो दक्षिणामूर्तयेऽस्मै ॥ ६ ॥

तस्याघोरशिवाह्वयोचितगुणं सच्छास्त्रमत्यादरात्
वन्दारुद्विजवृन्दवाञ्छितकरं वन्दामहेऽस्मद्गुरुम् ।
[त]येन त्रातमखेन शीतलदृशाऽनुग्रेण भोगीतरा-
लङ्कारेण मनोजकाङ्क्षितकृतास्सर्वे सनाथा बुधाः ॥ ७ ॥

श्री वैराग्यशिवाह्वयः कृतिमिदं शिष्यो विशिष्यो...
स्सोऽहं मोहतमोऽपहं विरचये श्री शैवतत्वा(मृ)तम् ।
प्र(प्रा)गल्भी परवादिखण्डनविधौ पु(कु)त्रापि कुण्ठेतरा-
नांगं जीर्यति...सुकृतिनां पुंसां यदास्वादनात् ॥ ८ ॥

पूर्वाचार्यकृपाकटाक्षगरुडानीतेन···श्रांबुधौ
प्रज्ञामन्दरभूधरेण बहुधा निर्मथ्य सारीकृतम् ।
अस्वीकृत्य च पूर्वपक्ष···परस्वान् बुध....
श्रेयस्कारणमा....पिबत श्री शैवतत्वामृतम् ॥

इह यद्यपि परमशिवत्वाभिव्यञ्जकरूपा षाड्गुण्याभि-व्यक्तिरूपा वा मुक्तिरादौ प्रेक्षावत्प्रवृत्त्यङ्गतया··· त्वं घटते तदनुकूलदीक्षाप्रकारो वा पदार्थ···तथाप्युपोद्घातसंगत्या मंगलमेवादौ निरूप्यते ॥

End:

तत्तमो नीलं न तु नीलिमा तम इति प्रतीतिविरोधादे-
वोपेक्षितं न चाजहल्लिङ्गत्वाभावे सति समानाधिकरणस-
मानविभक्तिकविशेषणपदत्वस्य विशेष्यलिंगग्राहकत्वनि-
यमात्तथैत्र प्रयोग इति वाच्यम् । ' गुणे शुक्लादयः पुंसि
गुणि लिंगास्तु तद्वति ।' इति विशेषविधानबलादुक्तन्या
यस्य बाधितत्वात् न च न्यायप्राप्ता । न च ...मात्रार्थ
त्वादेतस्य न विधायकत्वम् अन्यथा शुक्लं रूपमित्यादौ
शुक्लो रूपमित्यापत्तेरिति वाच्यम् । एतावत् ' गुणिलिङ्गा
स्तु तद्वति ' इत्यत्रांशेऽनुवादकत्वे ' गुणे शुक्लादयः
पुंसि ' इत्यत्रांशेऽनुवादत्वाभावात् । तस्यैव चात्र प्रकृत-
त्वाच्च चैवं शुक्लो रूपमित्यापत्तिः । तादृशप्रयोगाभावस्ये-
ष्टसाधनताज्ञानविडंबसाधुत्व... ।

Subject: Śaivatattvāmṛtam.

Remarks:—The Ms. is in a fairly good condition. There is a transcript copy of this Ms. in this library. Vide T. V. No. 277.

Vairāgyaśiva belongs to Vidyāraṇyapuri in the Karnāṭaka. This work of his is a commentary on the Vidyā (jñāna) pāda of the Mṛgendrottara in the Kāmikāgama. The subject matter of this pāda of the Āgama is philosophical, dealing as it does with the threefold Śaiva categories, Pati, Paśu and Pāśa. The anthor is very widely read in other Śāstras, especially in Nyāya and Mīmāṃsā and he treats these three categories in a scholarly manner. At the beginning there is

a big Maṅgalavāda in which 'Maṇi' is quoted and criticised and several Mīmāṃsā tenets are examined. The whole treatment is strictly philosophical and logical.

॥ शैवतत्त्वामृतम् ॥

8205. ŚAIVATATTVĀMṚTAM.

Burnell's Catalogue No. 11400. Page 208. Right column. Substance—Palm leaf. Size—$16\frac{1}{2}\times1\frac{1}{2}$ inches. Leaves—254 (24-277). Lines—6 to a Page. Script—Telugu. No. of Granthas—8000. Author—Vairāgyaśiva. Incomplete. Not Printed.

Beginning, end, colophon and subject—Same as No. 8203.

Remarks—The Ms. is in a fairly good condition.

॥ शैवरत्नाकरः ॥

8206. ŚAIVARATNĀKARAḤ.

Burnell's Catalogue No. 1727.

Substance—Paper. Size—10×4 inches. Sheets—61. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—2080 ? Author—Jyotirnātha. Complete. Printed.

Beginning:

श्री गणेशाय नमः ।

पश्चिमांबुधिकल्लोलमालाधृतपदाम्बुजः ।
अनेकयक्षगन्धर्वदेवदानवपूजितः ॥ १ ॥

संसारसागरस्यैव रोधस्थो परिवारिधेः ।
कर.........नि कृपालुः कृतमन्दिरः ॥ २ ॥

तस्य सौराष्ट्रनाथस्य परिचर्यापरायणः ।
आस्ते तत्रैव भगवान् कश्चिदोभिलनामवान् ॥ ३ ॥

देवागमपुराणानां पारगः परमार्थवित् ।
···जन्मकुलागूह्यः शिवभक्तिपरायणः ॥ ४ ॥

स श्रीमान्दोहिलाराध्यस्तस्मै भर्गाय गुग्गुलुम् ।
दत्ते नित्यं हि धूपार्थं मदेह समदोलितम् (?) ॥ ५ ॥

* *

शिवपञ्चाक्षरीसिद्धः त्रिकालज्ञः समाधिमान् ।
पत्रैर्विलिख्य पञ्चास्यः मं.............. ॥

यो यां प्रार्थयते विद्यां प्रकाशयति तत्र ताम् ।
तस्य शिष्यवरो ज्ञातो धरणीधरसंयमी ॥

* *

मल्लिनाथशिवदेवनामौ(मकौ)
तत्सुतौ गुणनिधी बभूवतुः ।
तत्र चाद्यतनयोऽवधूतता-
मास्थितो शिवनिमग्नमानसः ॥

द्वितीयपुत्रः शिवदेवधीमानपि
सङ्गीतसाहित्यकलाविलासितः ।
तदन्वयाम्भोनिधिपूर्णचन्द्रमा
बभौ जगन्मोहनमूर्तिमङ्गलः ॥

* *

शिवदेवाग्रजातस्य मल्लिनाथस्य नन्दनौ ।
धरणीधरयोगीन्द्रज्योतिर्नाथे विरेजतुः ॥

ज्योतिर्नाथस्सनाथस्सग(क)लमणिगणैः सर्वशास्त्रागमज्ञैः
योगी.. वियोगी भवभयदुरितैर्वीरमाहेश्वरोऽसौ ।
निर्मथ्य ज्ञानमन्थाखिलशिवपुराणागमाब्धिं दुरन्तं
शैवाचारोत्रितानां सुविशदमकरो(च्छैवरत्नाकराख्यम्) ॥

End:

तस्योदाहरणमाह-- श्रीमहाभारते

' दुर्वासोच्छिष्टभक्तेन पादबाह्याङ्गलेपनात् ।
सहस्रवर्षकायं हि प्राप्तवान् विष्णुरव्ययम् ॥ '

तस्मात्कारणात् ।

' सर्वभक्तगणप्रीतिभुक्ताशिष्टप्रसादकम् ।
गणप्रसादि यस्सोयं भुञ्जीत सुखलीलया ॥

च[ा]राचरप्रसादाश भोक्तुस्तच्छेषधारणात् ।
चराचराणां भूतानामपि मुक्तिर्भवेत्प्रिये ॥

प्रसादभोक्तॄन्निन्दान्ति ये जना भक्तिसंयुतान् ।
ते यान्ति पितृभिस्सार्धं नरकं नात्र संशयः ॥ '

Colophon :


इति शैवरत्नाकरे प्रसादमाहात्म्यं नाम पञ्चदशोऽध्यायः ॥

Subject : Śaivaratnākara, 1-15 Adhyāyas, in the form of extracts from various purāṇas dealing with the mythology, rituals, theology and ethics of Vīraśaiva.

Remarks:—The Ms. is in good condition. This and the following Ms. though numbered by Dr. Burnell, have not been noticed in his Catalogue.

The Ms. is full of omissions, many sent nces being incomplete.

The author of this work gives his geneolog thus—



This work is published with a Marāthi translation at Sholapur edited by Mallikārjuna Śāstri in the Vīraśaiva Liṅga Brāhmaṇa Dharma Granthamālā.

॥ शैवरत्नाकरः ॥

8207. ŚAIVARATNĀKARAḤ.

Burnell's Catalogue No. 1729.

Substance—Paper. Size—12¼ × 5½ inches. Sheets—59. Lines—11-15 to a Page. Script—Devanāgarī. No. of Granthas—2000. Author—Jyotirnātha. Complete, Printed.

Beginning, end, colophon and subject—Same as No. 8206.

Remarks :—The Ms. is in good condition. This is a copy of No. 8206.

॥ श्रुतिसूक्तिमाला (चतुर्वेदतात्पर्यसङ्ग्रहः) ॥

8208. ŚRUTISŪKTIMĀLĀ

(CATURVEDATĀTPARYASAṄGRAHAḤ.)

Burnell's Catalogue No. 9822 b.

Substance—Palm leaf. Size—18 × 1 inches. Leaves—9. Lines—8 to a Page. Script—Grantha. No. of Granthas —266. Author—Haradattācārya. Complete. Printed.

Beginning :

अविघ्नमस्तु । चतुर्वेदतात्पर्यसंग्रहम् ॥

यस्मै नमो भवति यस्य गुणाः समग्राः
नारायणोपनिषदा यदुपासनोक्ता ।
यो नः प्रचोदयति बुद्धिमधिक्रतौ यः
तं त्वामनन्यगतिरीश्वर संश्रयामि ॥ १ ॥

वेदेषु वा तदनुयायिषु वा विचार्य
तन्त्रेषु वाक्यमखिलं प्रतिपादकं ते ।
तात्पर्यसंग्रहमहं विदधे महेश
मह्यं प्रसीद नय मामृजुना पथा त्वम् ॥ २

End :

मक्कं भवानदितिपर्श्वचरोपनीतं
मह्यं महेश्वरपयश्चार्पितं प्रसन्नः ।

भुञ्जान एव तदहं झटिति प्रबुद्धः
स्वप्नः समाधिरिति युक्तधियामभिज्ञः ॥ २५० ॥

स्तोत्रमेतदवधार्य गृह्णता
मर्थमस्य निखिलेन जानताम् ।
ज्ञेयमन्यदपि नावशिष्यते
गुह्यमन्यदपि नापिकिंचन ॥ २५१ ॥

पञ्चाशदुत्तरशता श्रुतिसूक्तिमाला
भोगावली भुजगराजमनोहरा ते ।
वेदेषु सक्तिमपरागमवैदिकेषु
तन्त्रेषु भक्तिमचलां त्वयि च प्रसूते ॥ २५२ ॥

Colophon: Nil.

Subject: Śrutisūktimālā or Caturvedatātparyasaṅgraha.

Remarks:—The Ms. is in a fairly good condition. The othor work contained herein is Śrutisūktimlālāvyākhā.

It is not yet decided whether this Śaivācārya, Haradatta, is identical with the author of the Grammar work, Kāśikāvṛtti—Padamañjarī. For further information, please refer to the 'Śivādvaita" of S. S. Sastri.

The work under notice is a hymn to Śiva, bringing out his glory, in 150 stanzas.

The work appears along with another Śaiva work in a publication from Mysore, with a Kannada commentary under the name Caturvedatātparya Saṅgraha.

॥ श्रुतिसूक्तिमालाव्याख्या—तत्त्वप्रकाशिका ॥

8209. ŚRUTISŪKTIMĀLĀVYĀKHYĀ—TATTVAPRAKĀŚIKĀ.

Burnell's Catalogue No. 6400. Page 111. Right column. Substance—Paper. Size—13¼ × 5¾ inches. Sheets—66. Lines—8-12 to a Page. Script—Devanāgarī. No. of Granthas—1700. Author—Śivaliṅgabhaṭṭa. Complete. Not printed.

Beginning:

श्री गणेशाय नमः । श्री सांबसदाशिव । शिवकाम-सुन्दरीसमेतचित्सभेश्वराय नमः ।

इह खलु कलिकालकलनानन्तरमवैदिकबौद्धादिराद्धान्तानुसन्धानाविशुद्धबुद्धीन् विश्वनिरीश्वरत्वनिर्वाहकवैदिकापशब्दमीमांसककल्पितानल्पविकल्प जल्पश्रवणोन्मेषितकल्मषकलुषीकृतवृषाङ्कविषयशेमुषीकान्मनीषिणोऽनुग्रहीतुकामो महेश्वरांशावतारायमाणः पदवाक्यप्रमाणज्ञो हरदत्ताचार्यश्शैववैदिकतन्त्रविश्वासकारिणीमवैदिकमतामतिनिराकरणीं समस्तकल्मषापहारिणीं अशेषपुरुषार्थपूरणीमवैकभक्तिविभववितारिणीं पञ्चाशदुत्तरशतश्लोकात्मिकामीश्वरश्रुतिसूक्तिमालां चिकीर्षुर्लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायेन तस्मिन्ध्यर्थमस्यां श्रुतिसूक्ति-

मालायां प्राधान्येन प्रतिपादयितव्यानि नमःशेषित्वनिर-
तिशयैश्वर्यादिगुणकत्वनारायणोपनिषदुदीरितोपास्यत्वगा-
यत्रीप्रतिपाद्यत्वक्रतुशेषित्वरूपाणि पञ्चलक्षणानि सं-
गृह्णानः तद्विशिष्टत्वेनान्यसाधारणत्वादस्यैवाश्रयणीयत्व-
माह— ' यस्मै नम ' इति नमो नमस्कारो यस्मै यस्य
संबन्धी भवति ।

End:

मू ॥

पञ्चाशदुत्तरशता श्रुतिसूक्तिमाला

तन्त्रेषु भक्तिमचलां त्वद(त्वयि) च प्रसूते ॥ २५० ॥

व्या ॥

पञ्चाशदुत्तरं शतं श्लोकशतं यस्याः सा पञ्चाशदुत्त-
रशता । भोगावलीरूपकरूपा । अत एव भुजगराजमनो-
हरा शेषवर्णनो(वन्मनो)हरा ते श्रुतिसूक्तिमाला वेदेषु
सक्तिं संगं अवैदिकेषु तन्त्रेषु सिद्धान्तेषु अपरागं अस्नेहं
त्वय्यनुपमां अकु(तु)लां दृढामित्यर्थः भक्तिं प्रसूते जन-
यति ।

Colophon:

इति श्री प्रणतरिपुनरपतिशिरोरत्नमरीचिनिकरपरिरञ्जितचरणारविन्देन
निजशुभचरितपरिरञ्जितजनबृन्देन निजशुभचरितसत्परित्राणपरा-
यणेन वीरनारायणेन अनवरताङ्गीकृताष्टाङ्गयोगपवित्रितांतरंग-
साक्षात्कृतपशुपतिना शिवलिंगभूपतिना रचिता तत्त्वप्रकाशि-

काव्या श्रुतिसूक्तिमालाव्याख्या समाप्ता ॥

सांबसदाशिवार्पणमस्तु ॥

Subject: Śrutisūktimālāvyākhyā, known as Tattvaprakāśikā with the text.

Remarks:—The Ms. is in excellent condition.

If we take from the colophon that Śivaliṅga Bhūpati, the author of this work, is King Vīra Nārāyaṇa, we may identify him with the patron of Vāmanabhaṭṭa Bāṇa and the hero of Vemabhupālacarita. Ref. Introduction to the Śrī Vāṇī Vilās edition of the last mentioned Kāvya. But Vemabhūpāla is otherwise called Vīranārāyaṇa and was a Reddi King who ruled at Addaṅki in Guntur District. We do not see any reference to Vema or Addaṅki here.

———

ŚRUTISŪKTIMĀLĀVYĀKHYĀ—TATTVAPRAKĀŚIKĀ.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
8210	B. L. 6393	Paper.	$10\frac{1}{4}\times5\frac{3}{8}$	54	15	Devanāgarī.	Complete.
8211	„ 9820	Palm leaf.	$16\frac{1}{2}\times1$	233	5	Grantha.	„
8212	„ 9821	„	$19\times1\frac{1}{2}$	101	10	„	„
8213	Ms. 15588	„	$14\frac{7}{10}\times1\frac{1}{2}$	100	9-10	„	„
8214	B. L. 9822	„	$16\frac{3}{4}\times1\frac{1}{4}$	84	9	„	Incomplete.

DETAILED REMARKS

on the

ŚRUTISŪKTIMĀLĀVYĀKHYĀ—

TATTVAPRAKĀŚIKĀ MSS.

IN THE ABOVE TABLE.

8210 On the title page is given:—

"तुळजाभूपतेरिदम् । श्रीमदीशानपरमसदाशिवशंकरावधूतस्वामिनां

चतुर्वेदतात्पर्यसङ्ग्रहः आरम्भः ॥

From this as also from Aufrecht we come to know that Haradatta's work is also called Caturvedatātparya-saṅgraha.

8211 The following additional verse is seen at the end :—

"मिथ्याकल्पितभोगमोक्षदवचस्सन्तानसत्यावन-

ञ्यप्राणामाचिरप्रभावविबुधप्रेम्णा महेशद्विषाम् ।

मूर्धास्वेव दुरात्मनां विरचिता निर्घातपाताः परैः

विद्वद्भिः परमेश्वरस्तुतिकथा तात्पर्यसंग्राहकैः ॥

तात्पर्यं परमार्थतः तस्य संग्रहोऽयमुक्तः ।

हरिः ओम् । श्रुतिसूक्तिमाला समाप्ता ॥"

Dr. Burnell wrongly classifies the Mss. of this work under Vedānta and describes it incorrectly as 'a compilation from Śaṅkara's works etc.' It is a Śaivaite work trying to inculcate, in 150 verses, that the Vedas and other texts speak only of Śiva and that any other interpretation will only result in torture of texts.

At the end there is one loose leaf giving the following verses—

शुभमस्तु ।

नमो नमस्तेऽस्तु फणीन्द्र नम्रे (?)
प्रसिद्धविद्योत्तमसारदात्रे ।
ग्रन्थानुपादाय जनोपनीतान्
राज्ञे लसज्ज्ञानवते वराय ॥ १ ॥

ग्रामेषु सर्वेषु च विद्यमाना-
नाहूय लेख्यान्द्रविणं प्रदाय ।
तेभ्यो वदञ्जनमनोमधुरां सुवाचं
सोऽयं कवीन्द्रनुतितो मयि सुप्रसन्नः ॥ २ ॥

ततः परं साधुषु सत्प्रवृत्ते
दीनं कथञ्चिदवलोकय स मामनाथम् ।
सर्वेषु भूसुरवरेषु त्वदाश्रितेषु
मह्यं दयां कुरु सखे कविताग्रणीस्त्वम् ॥ ३ ॥

वस्त्रं मदीयमपहाय सहस्ररन्ध्रं
जीर्णं प्रदेहि विबुधोत्तमशीर्षहीर ।
मह्यं सुचारु वसनं फणिराजवर्य
दीनाय वस्त्ररहिताय कुटुम्बिने च ॥ ४ ॥


8212 This has been copied in this Library.

8213 At the end of the commentary are given the following additional verses—

तत्त्वप्रकाशिकाख्या (रम्या) शिवलिंगभूभुजा रचिता ।
अख्यातिनेतृलोके पुरहरपादाम्बुजार्पिता सततम् ॥

पञ्चमं षड्गुणं चैव सप्तत्रिंशद्वयं हि नः ।
अष्टादश च तन्मन्त्रं विंशत्सप्तम एव च ॥

In this Mss. the author gives the geneology of his Guru as follows :—



This Koṇḍaya whose Guru was one Srīgiri was the Guru of this author.

8214 The other work containd herein is Śrutisūktimālā.

॥ श्रुत्यर्थरत्नमाला ॥

8215. ŚRUTYARTHARATNAMĀLĀ.

Burnell's Catalogue No. 9890. Page 111. Left column. Substance—Palm leaf. Size—$15\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—145. Lines—4 to a Page. Script—Grantha. No. of Granthas—8000. Author—Dharmarāja Śivadīkṣita. Complete. Not Printed.

Beginning:

चतुर्विंशतिविशेषणविशिष्टः परमेश्वर इति सर्वश्रुतीतिहासपुराणेषु श्रूयते । चतुर्विंशतिविशेषणानि सकलभुवनसकलदेवतात्मकस्सकलजगत्कारणत्वेन सकलभुवनाधारस्सकलभुवनाधिपः सकलभुवनातीतः सकलभुवनान्तर्वर्ती सकलभुवनान्तर्नियामकस्त्रैलोक्यतिलकशिवराजधानि श्रीमत्कैलासवासी श्रीकण्ठनायकस्सकलभुवनदुष्टनिग्रहशिष्टपरिपालन ....सकलभुवननियन्ता सकलजगदाज्ञापक(ः) सकलजगत् सकलं यशः सकलभुवनपोषकः सकलस्य... सुरादिस्वभक्तजनसंरक्षणविचक्षणैकचिन्तामणिः तेषु परमशिवभक्तेषु हरिब्रह्मादिषु कदाचित्कदाचित् परमेश्वरमाययापहृतप्रज्ञतया स्वं स्वं रूपमनीश्वरत्वंविकाय(?) स्वस्वनियन्तारं स्वस्वपदैश्वर्यप्रदातारं परमेश्वरं च........ ॥

End:

हरेः प्रदोषेऽर्चनमानतिं च
सुकीर्तनं वा स्मरणं न कुर्यात् ।
सन्दर्शनं भक्तियुतेऽनवद्ये
तत्त्वक्षयश्चैव हि धर्मलोपः ॥

तान्त्रिकयाविष्णुमायदीक्षासंपन्नः?–
विष्ण्वर्चनासन्ततकार्यमाहुः
प्रदोषकालेन विनानवद्ये ।
तत्रापि कुर्वीत नृसिंहमूर्ते-
रालोकनार्चा...र्धनारी ॥

होढकं (?) जपं भोजनयानसर्व-
स्वाध्यायतैलार्तिहरिप्रसंगान् ।
त्यजेत्प्रदोषेषु नृसिंहमूर्ते-
रलोचनार्चानतयो न निन्द्यात् ॥

तस्मात्समाराधनमीश्वरस्य
यथाविधानं विनिधीत काले ।
तत्राभिषेकाभिरतिः शिवस्य
तच्छ्रुदवादं श्रृणु वक्ष्यमाणम् ॥

Colophon:

इति श्रुत्यर्थमालासु चतुर्विंशोऽध्यायः । इति श्रीशिवोत्कर्ष(र)समाप्तः ।

Colophon: (Leaf No. 128)

इति श्रीमत्सर्वश्रुतीतिहासपुराणार्थकल्पतरुकुसुमसङ्ग्रथितसर्वमतप्रति-पाद्यपरदेवतासन्देहनिरर्तकपक्षपक्षतस्वात्मकसकलभुवनातीतपरम-शिवोत्कर्षप्रकाशकश्रुत्यर्थमालासु द्वाविंशोऽध्यायः ॥

Colophon : (Leaf No. 11)

इति श्री परमकारुणिकपरमकल्याणपरमाशिवपदारविन्दपूजानिरतश्री-वत्सान्वयाविश्वाधिकाशिवतनय धर्मराजशिवदीक्षितान्तर्यामिस-दाशिवाविरचितश्रीमत्सर्वश्रुतीतिहास + प्रथमोऽध्यायः ।

Subject : Srutyarthmālā or Sivotkarsa, in 14 chapters.

Remarks:—The Ms. is in good condition and it has been copied in this Library.

Dharmarāja Sivadīkṣita, son of Viśvādhika Siva, of the Srī Vatsakula, has written this work called Srutyartha Ratna-mālā or Sivotkarṣa, proving Sivotkarṣa to be the import of

Vedas. He is identical with the author of the commentary Sadāśivaṭīkā on Vāsudevakavi's Yudhiṣṭhira Vijaya. Vide No. 3834. Vol. VI.

॥ ईषणानिवृत्तिशिवबोधिनी ॥

8216. ĪṢAṆĀNIVṚTTIŚIVABODHINĪ.

J. L. Collection No. 1001.

Substance—Paper. Size—9½ × 5½ inches. Sheets—4. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—90. Author—? Complete. Not printed.

Beginning:

श्री गणेशाय नमः ।

वदामि सरणिं सुखप्रणयिनीं सतां सम्मतां
सदा सवितुरान्तरं स्मरहरं समस्तेश्वरम् ।
निरञ्जनमनामयं निटिललोचनं निष्कलं
निरन्तरसुखाप्तयेऽनिशमुपास्व नित्यं शिवम् ॥ १ ॥

वदामि हितमादराच्छृणु सखे सखेदान्सदा-
श्रितान्विदधतेऽखिलान्विघटयन्ति ये चामृतम् ।
त्यजाशु विषयाश्च संश्रय विचित्रविद्वेषिणो
निरञ्जनपरामृतेश्वरमुपास्व मृत्युञ्जयम् ॥ २ ॥

End:

वधूतनुतनूजनुर्विषयबान्धवार्थेषणा-
निवृत्तिशिवबोधिनीं दशकयुग्मपद्यावलीम् ।
गृहाण चरणाम्बुजे स्रजमिवार्पितां बिभ्रता-
मिमां सुमनसां सतामनघ देहानन्वं शिवम् ॥ २२ ॥

Subject: Īṣaṇā-nivṛtti-Śivabodhinī, a short Upadeśa in 20 verses, advising the renunciation of desire and devotion to Śiva.

Remarks:—The Ms. is in good condition.

॥ माहेश्वरजनकोत्कृष्टपूज्यत्वप्रदर्शनम् ॥

8217. MĀHEŚVARAJANAKOTKṚṢṬA-PŪJYATVAPRADARŚANAM.

Burnell's Catalogue No. 9900.

Substance—Palm leaf. Size—$18\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—11. Lines—7 to a Page. Script—Grantha. No. of Granthas—250. Author—? Complete. Not Printed.

Beginning:

मंगलं दिशतु मे गणाधिपो
मंगलं दिशतु........ ।

.......दिशतु मे महेश्वरी ॥ १ ॥

ऐश्वरं परमं तत्त्वमादिमध्यान्तवर्जितम् ।
आधारं सर्वभूतानापनाधारमविक्रियम् ॥ २ ॥

अनन्तानन्दबोधांबुनिधिमद्भुतविक्रमम् ।
.... ॥ ३ ॥

* *

यद्ब्रह्मपञ्चमशिरोलवनापदानं
यद्ब्रह्मणा च हरिणा च मि(वि)मार्ग(य)न्ते ।

यद्वातयोर्जनयितारमधीमहे त्वां
तत्सर्वमीश्वरविमूढधियामसह्यम् ॥ इति ॥

अथ । भरद्वाजसंहितायां तयोरुत्पत्तिकारणं ।
उक्तवाङ्मानसस्नानात्रिधा सर्वसुशोभनम् ॥
ततो हृत्पङ्कजे ध्यायेदीश्वरं त्वामितौजसम् ।
अविकारं चाद्वितीयं सर्गस्थित्यन्तकारणम् ॥
ॐकारवाच्यममृतं भाभासितजगत्त्रयम् ।
सर्वलक्षणसंपन्नं सर्वाभरणभूषितम् ॥
शुद्धस्फटिकसंकाशं चन्द्रार्धकृतशेखरम् ।
त्रिलोचनं चतुर्बाहुं युवानं नीलकन्धरम् ॥
ज्वलन्मस्तकमाणिक्यमहाहिभुतिवेष्टनम् ।
सितक्षौमांबरधरं हेमयज्ञोपवीतिनम् ॥

End :

घनतरभवकारणान्धरं तम्
शिवदिनकृत्प्रभया न चापरेण ।
हरिरहमपरे सुरासुराद्याः
परमशिवप्रभया तिरस्कृताश्च ॥
परमशिवसमुद्रेऽहं हरिः सर्वदेवाः
मनुजपशुमृगाद्याः शीकरा एव सत्यम् ।
विमलमतिभिरेवं वेदवेदान्तनिष्ठैः
हृदयकुहरनिष्ठं वेदितुं शक्यते हि ॥

मायाबलेनैव हरिं शिवेन
समानमाहुः पुरुषाधमाश्च ।
मोहेन केचिन्मम साम्यमाहुः
माया तु शैवी खलु दुस्तरेयम् ॥

खद्योतो यदि चण्डभानुसदृशः तुल्यो हरिः शंभुना
निंबार्को यदि चन्दनेन सदृशः तुल्योहमीशेन वै ।
अज्ञानं यदि वेदनेन सदृशं देवेन तुल्यो जनः
किं वक्ष्ये सुरपुङ्गवा अहमहो मोहस्य दुश्चेष्टितम् ॥

एवमुक्तं समासेन श्रुतिस्मृत्यादिपूर्वकम् ।
जनकोत्कृष्टपूज्यत्वमीश्वरस्य विशेषतः ॥

एवं तु वैदिको ज्ञात्वा सर्वोत्कृष्टं सदाशिवम् ।
विद्यानाथं प्रणम्यादौ सर्वविद्याः समारभेत् ॥

Colophon:

इति महेश्वरस्य जनकोत्कृष्टत्वप्रदर्शनं समाप्तम् ॥

Subject: Māheśvarajanakotkṛṣṭapūjyatvapradarśana.

Remarks:—The Ms. is in a decaying condition. This Ms. though it has been given a number by Dr. Burnell, has not been noticed in his Catalogue. There is a transcript copy of this work in this library.

This work seems to be an independent pamphlet establishing Śiva over Hari. Its author is not known.

———

॥ वेदान्तरत्नत्रयपरीक्षा ॥

8218. VEDĀNTARATNATRAYAPARĪKṢĀ.

Burnell's Catalogue No. 9889. Page 92. Left column.

Substance—Palm leaf. Size—15 × 1½ inches. Leaves—54. Lines—6 to a Page. Script—Telugu. No. of Granthas—1000. Author—? Incomplete. Not Printed.

Beginning:

यस्य स्मरणमात्रेण विघ्नजालैर्विवर्जिताः ।
प्राप्नुवन्त्यखिलाभीष्टं तं वन्दे गणनायकम् ॥

ब्रह्मविष्णुमहेशानां स्वरूपं सगुणं यथा ।
संगीतं वेदवेदान्तैः तथा स्पष्टं वदाम्यहम् ॥

सेवकानां महेशस्य हरेश्चापि विधेस्सुखं ।
भजनार्थं महेशानः प्रीयतां मे हरिर्विधिः ॥

रुद्रः श्रेष्ठोऽधिको हेतुः ब्रह्मविष्णोर्महाप्रभुः ।
हरिर्वामाङ्गजो यस्य दक्षिणाङ्गभवो विधिः ॥

End:

योऽयं महेश्वरः साक्षात् प्रणवस्याप्यगोचरः ।
तदेव परमं ब्रह्म तद्धि वेदान्तगोचरम् ॥

सर्वैश्वर्येण संपन्नं सर्वेशं च स्वभावतः ।
तद्विज्ञाना............................... ... ॥

Colophon: Nil.

Subject: Vedāntaratnatrayaparīkṣā, an anonymous work in Anuṣṭub verses, on the model of Appayyadīkṣita's

Ratnatrayaparīkṣā, establishing the superiority of Śiva, amidst the trinity, from the Vedāntic standpoint.

Remarks:—The Ms. is in good condition. At the end there is one loose leaf dealing about माता, मानं and मेयं ।

॥ अनुत्तरतत्त्वविमर्शिनीवृत्तिः ॥

8219. ANUTTARATATTVAVIMARŚINĪVṚTTIḤ.

Burnell's Catalogue No. 12174 a. Page 208. Right column. Substance—Palm leaf. Size—$17\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaves—12 (1-12). Lines—11-12 to a Page. Script—Telugu. No. of Granthas—360. Author—Abhinavaguptapāda. Incomplete. Not Printed.

Beginning:

यत्र तेजांसि तेजांसि तमांसि च तमांस्यलम् ।
तेजांसि च तमांस्येतद्वन्द्वे ज्योतिरनुत्तरम् ॥

सदागमप्रवाहेण बहुधा व्याकृतं त्रि(कं) ।
श्रीमदुत्पलदेवीयं मतसारं तु वर्ण्यते ॥

सदाभिनवगुप्तं यत्पुराणञ्च प्रसिद्धिमत् ।
हृदय(?)तत्पराह्लासैः स्वयं स्फूर्जत्यनुत्तरम् ॥

इह खलु स्वात्मदेवतैव प्रमथ्यमानावस्थायां आत्मानं परामर्शेनानवरतं पृच्छतीत्यत उच्यते— श्री देव्युवाचेति । किं पृच्छतीत्यत आह— अनुत्तरमिति ।

अनुत्तरं स्वात्मदेव सद्यः का....रसिद्धिदम् ।
येन विज्ञानमात्रेण खेचरी समतां व्रजेत् ॥

हे स्वात्मदेव स्वात्मरूपदेवः सर्वत्र विषय इत्यर्थः । ज्ञाने करणे च प्रथममपि ...भिभूतं तव तावदनुत्तरं रूपं उत्तरमुत्कृष्टमपरिवर्ति तच्च जीवापेक्षया ग्रहकरूपपदात्मानं —स्वप्रकाशस्य न ग्राहकान्तरावस्तीत्यनुत्तरत्वं संविद्रूपं सर्वदा सर्वत्रावधूतं पूर्वापरदेशकालविहीनं अन... नीयं किन्तत्रोच्यतां । इदमुच्यते ॥

End :

'एतदभ्यसतस्सिद्धिः सर्वज्ञत्वमुपास्यते । ' इति तदभ्यासितुर्जीवन्मुक्तता परा....सिद्धिरिति यदालानं विशीर्णं त...सितं तत्रेधा ।

अत्राभिनवगुप्तेन भासितं तदनुत्तरम् ।
एतद्विवेकनिष्ठास्तु मा भूवन्भूमिभाजनम् ॥
सद्भिर्व्यः प्राप्नुताद्यैव भैरवीभावसम्पदः ।
सम्पूर्णानुत्तरानन्द.........विज्ञानताम् ॥
त्रिलोककवलीकारसमावेशविशारदः ।
यस्यास्सिद्धात्मनापूर्णमिच्छाज्ञानाक्रियात्मना ॥
विश्राम्यते यतश्चेयं वन्देऽनुत्तरसंविदम् ॥

Colophon :

समाप्ता चेयमनुत्तरतत्त्वविमर्शिनीत्रिंशिकावृत्तिरित्याचार्याभिनवगुप्त-

नाथस्येति शिवम् ॥

Subject: Anuttaratattvavimarśinīvṛtti, a commentary on Anuttaratattvavimarśinī.

Remarks:—The Ms. is in a fairly good condition. Dr. Burnell leaves this Ms. as an unidentified fragment.

Ācārya Abhinavaguptapāda, (A. D. 1000) the author of the Abhinavabhāratī and the Dhvanyālokalocana is as great an authority in Kaśmirian Śaivism as in Alaṅkāra. He holds there the place of Appayyadīkṣita in the history of South Indian Śaivism.

He has written many independent works as well as commentaries in Śaivism. There is a commentary of his on the Bhagavad Gita. The work under notice is perhaps his commentary on Utpala Raja's Iśvarapratyabhijña, a metrical summary of Śaivism. See the Kaśmir Series of Texts and studies Nos. XXVI and XXXIII.

॥ अनुत्तरतत्त्वविमर्शिनीवृत्तिः ॥

8220. ANUTTARATATTVAVIMARŚINĪ—VṚTTIḤ.

Burnell's Catalogue No. 9887 a. Page 95. Right column.

Substance—Palm leaf. Size—19¾ × 1⅜ inches. Leaves—7. (1-7). Lines—10 to a Page. Script—Telugu. No. of Granthas—800. Author—Abhinavaguptapāda. Incomplete. Not Printed.

Beginning—Same as No. 8219.

End:

कामात्मशक्तिपीठत्रयं च भित्वा तदुपरिभागस्थितामृतकरबिंबान्तर्गलितामृतसागरमध्ये तदमृतं पायंपायमेतत्–आगलान्तममृतं पीत्वा ततः स्वरावृत्या...नादधानास्ति नैव वाचकं शाखामूलाधारं प्रदेश...सरेऽपि तदेवमूर्ध्वं गच्छेत् पुनरपि तदेवाधारमित्येवं निहताभ्यासेन योनि...रन्ध्रं भित्वा....सिद्धस्य उक्तफलानि भवन्ति ।

Colophon:

परदेवतायै नमः ।

Subject: Anuttaratattvavimarśinīvṛtti.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given the following verse—

चक्रं चैन्दवमम्बिकामयमिदं वामादयो ये भ्रमा-
ज्ज्येष्ठेयं यदिदं पुरन्दरपुरे रेखाचतुष्कं बहिः ।
योऽयं शक्त्यपरैश्चिरेण निवहन्रौद्रीयमित्यामृशत्
योग्यासारकृतीरयं कलयतो मातन्यते पूजकः(?) ॥

॥ विरूपाक्षपञ्चाशिकाव्याख्या—समूला ॥

8221. VIRŪPĀKṢAPAÑCĀŚIKĀVYĀKHYĀ—SAMŪLĀ.

Burnell's Catalogue No. 12122. Page 208. Right column.

Substance—Palm leaf. Size—12⅝ × 1½ inches. Leaves—27 (215-241). Lines—6 to a Page. Script—Telugu. No. of Granthas- 700. Author—Śrīvidyācakravartin. Complete. Printed.

Beginning;

नमो विश्वशरीराय विश्वैकात्म्यावभासिने
नित्यप्रत्यवमर्शाय शम्भवे विश्वसिद्धये ॥

संवित्सिद्धान्तसिद्धार्थसारसङ्ग्रहरूपिणीम् ।
पञ्चाशिकां विरूपाक्षप्रोक्तां व्याकुर्महे वयम् ॥ २ ॥

तत्र शास्त्रमवतारयितुं पीठिकाबन्धमारचयति—

गन्धगजसमररसिका
येन्द्रायप्रकटिताद्रियुगसमरः ।
निजसिद्धिबीजमस्मै
कथयति पृष्टो विरूपाक्षः ॥ १ ॥

End:

अथ शास्त्रमुपसंहरन्नाह-

इति बोधितस्स इन्द्रो देवेष्वधिकारमलमपास्य स्वम् ।
आविष्टशक्तिपातः शिववदपश्यत् स्वपात्मानम् ॥ ५३ ॥

अपि तु 'जगतोऽस्य साक्षात्परमेश्वर एवास्मि' इति निष्प्रत्यवायं प्रत्यपद्यतेति शिवम् ॥

स्वरूपप्रत्यभिज्ञानमनायासेन लिप्सुभिः ।
पञ्चाशिकाया विशदा वृत्तिरेषा निषेव्यताम् ॥

कृतेयं विवृतिर्लघ्वी श्रीविद्याचक्रवर्तिना ।
गोविन्दचन्द्रधीमान्नि निकषे विनिवेशिता ॥

Colophon: (Leaf No. 236)

इति श्रीमन्महेश्वराचार्यश्रीविद्याचक्रवर्तिनः कृतौ विरूपाक्षपञ्चाशि-
काविवरणे विमर्शस्कन्धः तृतीयः ॥

Subject: Virūpākṣapañcāśikāvyākhyā, 1-4 Skandhas.

Remarks:—The Ms. is in a fairly good condition. Dr. Burnell notices this Ms. as an unidentified fragment.

The Virūpākṣapañcāśikā, in 50 verses, by Virūpākṣanāthapāda, in the form of an advice to Indra, is a metrical manual of the Kaṣmīrian Śaivism called Pratyabhijñādarśana.

The commentator is a Great Śaivācārya, Śrī Vidyācakravartin, pupil of Govinda Candra. He is the author of a commentary called 'संप्रदायप्रदर्शिनी' on the Kāvyaprakāśa and of other works also. He was a protege of King Ballāla and thus belonged to the 14th century. For further information about him, vide introduction to the Trivandrum edition of the Kāvyaprakāśa.

The Virūpākṣapañcāśikā with its commentary has been published as No. 9 in the Trivandrum Sanskṛt Series.

॥ विरूपाक्षपञ्चाशिकव्याख्या—समूला ॥

8222. VIRŪPĀKṢAPAÑCĀŚIKĀVYĀKHYĀ—SAMŪLĀ.

Burnell's Catalogue No. 12191. Page 208. Right column. Substance—Palm leaf. Size—$8 \times 1\frac{3}{8}$ inches. Leaves—27. Lines—10 to a Page. Script—Grantha. No. of Granthas—550. Author—Śrīvidyācakravartin. Incomplete. Printed.

Beginning, end, colophon and subject—Same as No. 8221.

Remarks:—The Ms. is in a decaying condition. Some leaves are misplaced; the last two leaves really belonging to the middle of the Ms. The text wants a little at the end.

Dr. Burnell leaves this Ms. as an unidentified fragment.

॥ विरूपाक्षपञ्चाशिकाव्याख्या—समूला ॥

8223. VIRUPĀKṢAPAÑCĀŚIKĀVYĀKHYĀ—SAMŪLĀ.

Burnell's Catalogue No. 12190. Page 208. Right column. Substance—Palm leaf. Size—$7\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—48. Lines—7 to a Page. Script—Telugu. No. of Granthas—700. Author—Śrīvidyācakravartin. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 8221.

Remarks:—The Ms. is in a decaying condition. This is noticed among the unidentified fragments in Dr. Burnell's catalogue.

॥ चैतन्यमतम् ॥

CAITANYAMATAM.

॥ भक्तिमीमांसा ॥

8224. BHAKTIMĪMĀMSĀ.

P. A. Collection No. 107 a.

Substance—Paper. Size—10 × 4½ inches. Sheets—3 (3-5). Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—35. Author—Śāṇḍilya. Incomplete. Printed.

Beginning:

मिथोपेक्षणादुभयम् ।

चेत्याचितोर्न तृतीयम् ।

युक्तौ च सम्प्रदायात् ।

शक्तित्वान्नानृतं चेत्यम् ।

तत्परिशुद्धिश्च गम्या लोकवल्लिङ्गेभ्यः ।

End:

संसृतिरेषामभक्तिः स्यान्नाज्ञानात्कारणासिद्धेः ।

त्रीण्येषां नेत्राणि शब्दलिङ्गाक्षभेदाद्रुद्रवत् ।

आविस्तिरोभा(व)विकाराः स्युः क्रियाफलसम्बन्धात् ।

भजनीये न विकारिणः । षट् ॥ १६ ॥

Colophon:

इति तृतीयोऽध्यायः ।

समाप्ता चेयं त्रिलक्षणीभक्तिमीमांसा ॥

श्रीशाण्डिल्यमुनिप्रणीतभगवत्सद्भक्तिमीमांसिका-

शास्त्रेऽध्यायगुणस्थसूत्रगणनास्त्वाद्येष्टयुग्विंशतिः ।